Utrecht University Library
Partner in Science
Universiteit Utrecht

# Baudhâyana-G?hyasûtra

https://hdl.handle.net/1874/202461

33

Baudhayangrhya

No 33.

॥ बौधायन गृह्य सूत्रम् ॥

भट्टपल्लीवास्तव्येन श्री कुञ्जविहारि न्यायभूषण शर्म्मणा
लिखितं ॥

यथादृष्टं तथा लिखितं लेखके नास्ति दूषणम् ॥

26th November 1896

Alphab. Index of MSS. purchased up to 1891

Vol. XV Notices of Skt. MSS. prepared by Haraprasad Sastri

1229 (page 77) bauthāyanagṛhs.

श्रीगणेशायनमः। श्रीबौधायनायनमः। ॐमथो एतद्धुतश्चाहुतः प्रहुतः शूलगवो
बलिहरणं प्रत्यवरोहणमष्टकाहोम इति सप्त पाकयज्ञसंस्था इति ताअनु
व्याख्यास्यामस्तत्र यद्धूयते सद्धुतो यथैतद्विवाहः सीमन्तोन्नयनंचेति।
तत्र हि हूयत एवाथ यद्धुत्वा दीयते स प्रहुतो यथैतज्जातकर्म चौलंचेति।
तत्रहि हुत्वा दीयते एवाथ यद्धुत्वा दत्वा चादीयते स आहुतो यथैतदुपनयनं समा
वर्त्तनंचेति। तत्र हि हुत्वा दत्वा चादीयतेऽथ यच्छूलेषूपनह्य गव्याधिश्रपयन्ति
? स शूलगवोऽथ यद्गृह्याभ्यो देवताभ्यो नं संप्रकिरन्ति तद्बलिहरणमथ
? यदृतावृतौ प्रत्यवरोहन्ति तत्प्रत्यवरोहणमथ यदेकाष्टकायामं नं
क्रियते सोऽष्टकाहोम इति विवाहं व्याख्यास्यामः। उदगयने आपूर्यमाण
पक्षे पुण्ये नक्षत्रे युग्मान् ब्राह्मणान् वरान् प्रहिणोति। प्रसुग्मं ताधिय
सानस्य सक्षणि वरेभिर्वरां अभि षु प्रसीदत॥ अस्माकमिन्द्र उभयं
जुजोषति यत् सौम्यस्यान्धसो बुबोधतीति यतोऽनुमन्त्रयते अनृक्षरा
ऋजवः सन्तु येभिः स एवायो यन्ति नो वरेयं। समर्यमासं भगो नो निनी
यात् संजास्पत्यसुयमयस्तु देवा इति। अथ यदि दक्षिणाभिः सह दत्ता
स्यान्नात्र वरान् प्रहिणुयात्तां प्रतिग्रहीष्यन् प्रजापतिः स्त्रियां यश इत्ये
ताभिः षड्भिरनुच्छन्दसं सर्वे मासा विवाहस्य शुचितपस्तपस्यवर्ज
मित्येके रोहिणीमृगशीर्षमुत्तरफल्गुनी स्वातीति ~~विवाहस्य~~ विवाहस्य
नक्षत्राणि। पुनर्वसु तिष्यो हस्तः श्रोणा रेवतीत्यन्येषां भूतिकर्मणां।
यानि चान्यानि पुण्योक्तानि नक्षत्राणि तेषु पूर्वेद्युरेव वृद्धिपूर्तेषु युग्मान्
ब्राह्मणान् भोजयेत्। तत्र दक्षिणमुपचार पुष्पफलाक्षत मिश्रैर्यवैस्ति-
लार्थमुपलिप्य दध्योदनं संप्रकीर्य पुष्पैः फलैरक्षतैः सहोदकुम्भमा
दाय दक्षिणजानुं भूमौ निधाय सव्यमुद्धृत्य जपतोऽा देवद्रत्यन्ता
दनुवाकस्य नान्दीमुखाः पितरः प्रीयन्तामितिवाचयित्वाद्य विवाह
इति ब्राह्मणानां तेन परिविष्य पुण्याहं स्वस्तिमृद्धिमित्योंकारपूर्वां
स्त्रिस्त्रिरेकैकामाशिषो वाचयित्वा स्नातोऽहतवासा गन्धानुलिप्तः
? स्रग्वी भुक्तवान् प्रतोदपाणिरुपदार्गत्वा वधूज्ञातिभिरतिथि
वदर्चितः स्नातामहतवाससं गन्धानुलिप्तां स्रग्विणीं भुक्तवती
मिषुहस्तां दत्तां वधूं समीक्षते अभ्रातृघ्नीं वरुण पतिघ्नीं बृहस्पते
इन्द्र पुत्रघ्नीं लक्ष्म्यं तामस्यै सवितं सुवेति तयेक्ष्यमाणो जपत्यघोर
चक्षुर पतिघ्न्येधि शिवा पतिभ्यः सुमनाः सुवर्चा जीवसूर्देवकामा स्योना
? शं नो भव द्विपदे शं चतुष्पदे इत्यथैनामन्तरेण भ्रुवौ दर्भेण
? संमार्ष्टि इदमहं या त्वयि पतिघ्नी लक्ष्मीस्तां निर्दिशामि इति
दर्भं निरस्याप उपस्पृश्याथैनां दक्षिणे हस्ते गृहीत्वा मित्रोसीति

अथैनां देवयजनमुदानयति एकमिषे विष्णुस्त्वान्वेतु त्रीणि व्रताय
? विष्णुस्त्वान्वेतु चत्वारि मयोभवाय॰तु पंच पशुभ्यो॰तु षड्रा यस्पोषाय॰
? तु सप्त सप्तभ्यो होत्राभ्यो॰तु इति सप्तमं पदमुपसंगृह्य जपति सखासि
सप्तपदा अभूम सख्यं ते गमेयं सख्यात्मा योषं सख्यान्मे मा योष्ठा इति ॥
॥२॥ आवेयार्घ्यं कुर्या मध्येऽगारस्योदीचीन प्रतिवेवश एरका उपस्तृणीते तास्वहतानि
षड्गुणा न्युत्तरदशानि वासांस्यास्तीर्य तेषु त्विजः प्राङ्मुखा उपविशन्ति उत्तरपूर्वे
देशेऽगारस्य प्राक्शूलान् दर्भान् संस्तीर्य तेषर्घ्यद्रव्याणि संसादयति यावन्त
ऋत्विजस्तावन्ति कांस्यानि पात्राणि सपिधानानि तावतः कूर्चान् द्वावन्यौ परि
ग्रहणीयौ कूर्चौ दधिमधुघृतमापः पयो वस्त्रयुगानि कुण्डलयुगानि यस्यै
गौः पयश्च मसं सगलङ्करणीयश्चेति पवित्रे कृत्वा तूष्णीं संस्कृताभिरद्भिरुत्तानानि
पात्राणि कृत्वा प्रोक्ष्य कूर्चे कांस्यं निधाय तिरःपवित्रमध्वानयति दधि पयो वा
द्वितीयं सद्विवृत् घृतं तृतीयं सत्रिवृच्च द्वितीयं तच्चतुर्थं सचतुर्वृदायः पंचमीः
सपांक्तो वर्षीयसा तेजोमयेनापिधाय नानापुरुषा अर्घ्यद्रव्याण्याददते अन्वगनु
संव्रजिता कूर्च इति कूर्चं प्राह ततसुकूर्च इतीतरः प्रतिगृह्णाति प्रत्याहृतं प्रद
क्षिणं पर्यस्योदगावृत्त उपविशति पुरस्ताद्वैनं प्रत्यंचमुपोह्यते राष्ट्रभृदस्याचार्या
संदीमाच घोषमिति। अथास्मा उदपात्रमादाय कूर्चाभ्यां परिगृह्य पाद्या आप
इति प्राह ता अनुमंत्रयते आपः पादावनेजनी द्विषन्तं नाशयन्तु मे। अस्मिन्
कुले ब्रह्मवर्चस्य सानीति दक्षिणं पादं पूर्वं ब्राह्मणाय प्रसारयति सव्यं शूद्राय
स्त्री प्रक्षालयति पुमानभिषिंचति विपरीतमित्येकेऽनियमात् पत्नीयजमानौ
जङ्घे धावयतोऽवनेक्तुः पाणी संमृशति। मयि महो मयि भगो मयि गर्भो
मयि यश इत्यप उपस्पृश्य मयीन्द्रियं वीर्यमित्युरः प्रत्यात्मानं प्रत्यभिमृशते
ऽपो व्रीहिभिर्यवैर्वा समुदायुत्य तथैव कूर्चाभ्यां परिगृह्यार्हणीया आप इति
प्राह ता अनुमंत्रयते आमआगाद्वर्चसा यशसा संसृज पयसा तेजसा च।
तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनामित्येकदेशं मंजलावानीयमानमनुमंत्र
यते विराजोऽसि विराजो दोह मम पद्याय विराजे त्यतिशिष्टाः पराचीर्निनीय-
माना अनुमंत्रयते समुद्रं वः प्रहिणोम्यक्षिताः स्वां योनिमपि ~~मते योरस्य~~
गच्छत। अच्छिद्रः प्रजया भूयासं मा परा सेचि मत्पय इत्यथ तथैव कू
र्चाभ्यां परिगृह्योपस्परणीया आप इति प्राह। ताः पिबत्यमृतोपस्तरणमसी
ति त्रिराचामेत् त्रिः परिमृजेत् द्विरित्येके आचान्ता याया वृत्ताय तथैव कूर्चा
भ्यां परिगृह्यार्घ्य इति प्राह मधुपर्क इति वा मधुपर्कं प्रोक्तमनुमंत्रयते त्रय्यै विद्यायै
यशोऽसि यशसो यशोऽसि ब्रह्मणो दीप्तिरसि तं मा प्रियं प्रजानां कुर्वधिपतिं
पशूनामिति तदुभाभ्यां हस्ताभ्यां प्रतिगृह्णाति ॥२॥
देवस्य त्वा हस्ताभ्यां प्रतिगृह्णामीति तस्मिंश्चेत् किञ्चिदापतितं स्यात्तदङ्गुष्ठेनच

महानाम्न्यो वोपसंगृह्येमां दिशं निरस्यति नेष्टा विद्धं कृंतामितो याते घोरा तनू
स्तया तमाविश योऽस्मान् द्वेष्टि यञ्च वयं द्विष्म इति । अथाप उपस्पृश्य सर्वाभि
रङ्गुलीभिः समुद्रायुत्य प्राश्नाति यन्मधुनो मधव्यं परममन्नाद्यं वीर्यं । तेनाहं
मधुनो मधव्येन परमेणान्नाद्येन वीर्येण परमोन्नादो मधव्यो सानीति त्रिः
प्राश्य त्रिरनुपिबेद्देषञ्च कुर्यात्ममालनः श्रेयांसमिच्छेत्तस्मै शेषं दद्या
दिद्याचान्तायापावृत्ताय तथैव कूर्चाभ्यां परिगृह्यापिधानीया आप इति प्राह
ताः पिबत्यमृतापिधानमसीति त्रिराचामेत् त्रिः परिमृजेत् द्विरित्येके । आचा
न्तायापवृत्ताय गौरिति गां प्राह तामनुमन्त्रयते गौरस्यपहतपाप्माय
पाप्मानं नुदस्व ममामुष्यचेत्युपनेतुर्नाम गृह्णाति । नानामहर्त्विग्भ्यो गाः
प्राहैकां होत्रकेभ्यः सर्वेभ्यो वै कामविभवलाद्यः प्राह तस्मा उपाकरो
त्येकदेशं वपायै जुहोत्यग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अ
स्मभ्यमोषधीः कृणोति विश्वचर्षणिरित्येकदेशमुपहरति । तत् प्राश्नात्यग्निः
प्रथमः प्राश्नातु स हि वेद यथा हविः । अरिष्टमस्माकं कृणोत्वसौ ब्राह्मणो
ब्राह्मणेष्विति । स यदि करिष्यन् ~~भवति~~ भवति कुरुतेत्याहाथ यद्यु
त्स्रक्ष्यन् भवति तामनुमन्त्रयते गौर्धेनुर्भव्या माता रुद्राणां दुहिता वसूनां
स्वसादित्यानाममृतस्य नाभिः । प्रणुवोचं चिकितुषे जनाय मागामनागाम
दितिं वधिष्टपिबतूदकं तृणान्यत्त्वोमुत्सृजतेति तस्या ~~मु~~ मुत्सृष्टायां मेष
मजम्वालभत आरण्येन वा मांसेन नत्वेवामांसोर्घ्यः स्यादशक्तौ पिष्टान्नं संसि
ध्येत् सिद्धे भूतमित्याह तत् सुभूतमितीतरः प्रत्याह । तदभिमन्त्रयते भूतं
सा विराट् तन्माक्षायि तन्मेशीय तन्म ऊर्जं धात्तुं कल्पयतेति चतुरो
नानागोत्रान् ब्राह्मणान् भोजयतेत्येवं ब्रूयात् तेषु भुक्तवत्स्वन्नमस्मा
उपहरन्ति तत् प्राश्नाति विराडसि विराडन्नं विराड्विराजो मयि धेहीति
भुक्तवद्भ्यो वस्त्रयुगानि कुण्डलयुगानि यस्यै गौः पयश्चमसं स्रगलङ्करणीय
मिति च दद्यादेकधनः यष्टोंहीरआमि ~~ये~~ येके ~~अमुमु~~ प्राङ्मधुपर्कादलङ्करण
मेके समामनन्ति मह्यर्त्विजमाचार्यं चात्मानं वा एष मह्यति यः स्वमृ
त्विजमाचार्यञ्च महयत्येवं वृता आर्त्विज्याः स्युः पतितोऽननूचान इति निमि
त्तैमतिवरणेऽग्न्याधेयप्रभृति येषामृत्विक् स्मरेत् यथैतेऽर्घ्या ऋत्विक् श्व
शुरपितृव्यमातुलाचार्याः राजा स्नातकः प्रियो वरोऽतिथिरिति संवत्सरपर्यागते
भ्यः एतेभ्य एवं कुर्यात् विवाहे वरायाथ ऋत्विग्भ्यः कर्मणि कर्मणि ~~स्य~~ संवि
ददाति ॥३॥ अथ शुचौ समे देशेऽग्न्यायतनदेशं शकलेन त्रिः प्राची
नमुल्लिखेत् त्रिरुदीचीनमथाद्भिरभ्युक्ष्य शकलं निरस्याप उपस्पृश्य यज्ञि
यात् काष्ठात् अग्निं मथित्वा श्रोत्रियागाराद्वाहृत्य व्याहृतीभिर्निधायोप
समाधायोपतिष्ठते जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान्

विश्वा अग्ने अभियुजो विहत्य शत्रूयतामाभरा भोजनानीत्यथैनं प्रदक्षिणमग्निं
परिसमूह्य पर्युक्ष्य परिस्तीर्य प्रागग्रैर्दर्भैरग्निं परिस्तृणात्यपि चोदगग्राः पश्चात्
पुरस्ताच्च भवन्ति दक्षिणानुत्तरानुत्तरानधरान् यदि प्रागुदगग्राः उत्तरेणाग्निं
प्रागग्रान् दर्भान् संस्तीर्य तेषु द्वन्द्वं न्यञ्चि पात्राणि संसादयेत् देवसंयुक्तान्ये
कैकशः पितृयुक्तानि सकृदेव मनुष्यसंयुक्तानि यत्सह सर्वाणि मानुषाणीति
तस्मात् ब्राह्मणात् पवित्रे कृत्वा तूष्णीं संस्कृताभिरद्भिरुत्तानानि पात्राणि कृत्वा
विस्रस्येध्मं त्रिः सर्वाभिः प्रोक्ष्य दर्भेषु दक्षिणतो ब्राह्मणं उपवेशयत्युत्तरत
उदपात्रमथ तिरः पवित्रमाज्यस्थाल्यामाज्यं निरूप्योदीचोऽङ्गारान्निरूह्य व्यं
तान् कृत्वा तेष्वधिश्रित्याभिद्योतनेनाभिद्यो~~तने~~त्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाल्य प्रत्यस्य
पुनरभिद्योत्य त्रिः पर्यग्निकृत्वा वर्त्म कुर्वन्नुदगुद्वास्य प्रत्यूह्याङ्गारानथैनदुदीची
नाग्राभ्यां पवित्राभ्यां पुनराहारं त्रिरुत्पूय विस्रस्य त्रिः पवित्रैरद्भिः संस्पृश्याग्नावनुप्र
प्रहरति । अथ शम्याः परिदधाति खादिरी दर्वी तेजस्कामस्यौदुम्बर्यन्नाद्यकामस्य
पालाशी ब्रह्मवर्चसकामस्येत्यथ हैकेषां विज्ञायते निर्ऋतिगृहीता वै दर्वी यद्दर्व्या
जुहुयान्निर्ऋत्यास्य यज्ञं ग्राहयेत्तस्मात् स्रुवेणैव होतव्यमिति पालाशेन स्रुवेणेत्यात्रेयः ।
खादिरेणेत्याङ्गिरसः ताम्रायसेनेत्यथर्वणः कृष्णायसेनाभिचरन्निति सार्वत्रिकमन्यो
क्तवास्यैतावत् कृत्वा गमनं काङ्क्षन् दपरेणाग्निमुदीचीनप्रतिषेवणामेरकां साधीवासामा
स्तीर्य तस्यां प्राञ्चावुपविशत उत्तरतः पतिर्दक्षिणा पत्न्यथान्वारब्धायां प्रदक्षिणमग्निं परि
षिञ्चति अदितेऽनुमन्यस्वेति दक्षिणतः प्राचीनमनुमतेऽनुमन्यस्वेति पश्चादुदीचीनं
सरस्वत्यनुमन्यस्वेति उत्तरतः प्राचीनं देव सवितः प्रसुव यज्ञं इति समन्तं प्रदक्षिणं
समन्तमेव वा तूष्णीमथेध्ममभ्यज्य परिसमिधं शिनष्टि स्वाहाकारेणाभ्याधायाघारा
वाघारयति प्रजापतये स्वाहेति मनसोत्तरे परिधिसन्धौ संस्पर्श्याह्णाया संततमिन्द्राय
स्वाहेत्युपांशु दक्षिणे परिधिसन्धौ संस्पर्श्याह्णायासंततमथाज्यभागौ जुहोत्यग्नये
स्वाहेत्युत्तरार्धपूर्वार्धे सोमाय स्वाहेति दक्षिणार्धपूर्वार्धेऽथाग्निमुखं जुहोति ॥४॥
युक्तो वह जातवेदः पुरस्ताद~~ग्ने~~ग्ने विद्धि कर्म क्रियमाणं यथेदं त्वं भिषग्भेषज
स्यासि कर्ता त्वया गा अश्वान् पुरुषान् सनेम स्वाहा चतस्र आशाः प्रचरन्त्वग्नय इमं
नो यज्ञं नयतु प्रजानन् । घृतं पिन्वन्नजरं सुवीरं ब्रह्म समिद्भवत्याहुतीनां स्वाहा
आ नो भद्राः क्रतवो यन्तु विश्वतो दब्धासो अपरीतास उद्भिदः । देवा नो यथा सद
मिद्वृधे सन्न प्रायुवो रक्षितारो दिवे दिवे स्वाहा विरूपाक्ष मा विवाधिष्ठा मा विवाध
विवाधिथाः । निर्ऋत्यैता पुत्रमाहुः स नः कर्माणि साधय स्वाहा । विरूपाक्षमहं
यजे निजंघं शबलोदरं । यो मायं परिवाधते श्रियै पुष्ट्यै च नित्यता तस्मै स्वाहा ।
यातिरश्ची निपद्यसे इं विधरणी इति । तां त्वा घृतस्य धारयाग्नौ सँराधनीं यजे
स्वाहा सँराधन्यै देव्यै स्वाहा भूः स्वाहा भुवः स्वाहा सुवः स्वाहा भूर्भुवः सुवः
स्वाहा इत्येतावत् सर्वदर्विहोमानामेष कल्पः ॥५॥ अथास्या उपोत्थाय

दक्षिणेन हस्तेन दक्षिणमंसं प्रतिबाहुमन्ववहृत्य हृदयदेशमभिमृशति "मम
हृदये हृदयं ते अस्तु मम चित्ते चित्तमस्तु ते। मम वाचमेकमना शृणु मामेवा
नुव्रता सहचर्या मया भवेत्यथास्यै दक्षिणे कर्णे जपति मो ते मनः प्रवि
शतु मां चक्षुर्मामु ते भगः। मयि सर्वाणि भूतानि मयि प्रज्ञानमस्तु ते। मधु
हे मध्वगाहे जिह्वा मे मधुवादिनी। मुखे मे सारघं मधु दत्सु संवननं
कृतं। चाक्रवाकं संवननं यन्नदीभ्य उदाहृतं। यद्विद्वो देवगन्धर्वो तेन संव-
निनौ स्वः। स्पृशामि तेऽहमङ्गानि वायुरापश्च मापरः। मां चैव पश्य सूर्यञ्च
मान्येषु मनः कृथाः। सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयोऽग्नि
ष्टे पति स्तुरीयस्ते मनुष्यजाः। सोमो ददद्गन्धर्वाय गन्धर्वो ददद्ग्नये। रयिञ्च
पुत्रांश्चादादग्निर्मह्य मथो इमां। सरस्वति प्रेदमव सुभगे वाजिनीवति। तां त्वा
विश्वस्य भूतस्य प्रजायामस्याग्रत इत्यथास्यै दक्षिणेन नीचा हस्तेन दक्षिणमुत्तानं
हस्तं साङ्गुष्ठं मभीव लोमानि गृह्णाति गृभ्णामि ते सुप्रजास्त्वाय हस्तं मया
पत्या जरदष्टिर्यथासः। भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवा
इत्यथैनां प्रदक्षिणमग्निं पर्य्याणयति परि त्वाग्ने पुरं वयं विप्रँ सहस्य धीमहि।
धृषद्वर्णं दिवे दिवे भेत्तारं भङ्गुरावत इत्यथौ~~नां प्रदक्षिणमग्नि~~पविश्यान्वारब्धाया
मेकादशोपयमनीर्जुहोति अग्नेशर्धमहते सौभगाय तव द्युम्नान्युत्तमानि सन्तु। संजा
स्पत्यँ सुयममाकृणुष्व शत्रूयतामभितिष्ठा महांसि स्वाहा सोमाय जनिविदे
स्वाहा गन्धर्वाय जनिविदे स्वाहा अग्नये जनिविदे स्वाहा कन्यया पितृभ्यो
यतीपतिलोकमवदीक्षामदास्थ स्वाहा। प्रेतो मुञ्चाति नामुतः सुबद्धाममुत-
स्करत्। यथेयमिन्द्र मीढ्वः सुपुत्रां सुभगां कुरु। दशास्यां पुत्रानाधेहि पति
मेकादशं कृधि स्वाहा अग्निरैतु प्रथमो देवतानां सोऽस्यै प्रजां मुञ्चतु मृत्युपा-
शात्। तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् स्वाहा।
इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवता
मस्तु माता पौत्रमानन्दमभिप्रबुध्यतामियं स्वाहा मा ते गृहे निशि घोष उत्था
दन्यत्र त्वद्रुदत्यः संविशन्तु मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके
विराज पश्यन्ती प्रजाँ सुमनस्यमानाँ स्वाहा अप्रहस्तां पौत्रमृत्युं पाप्मान
मुत वाघं। शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशँ स्वाहेति
अथैनामुत्थाप्योत्तरेणाग्निं दक्षिणेन पदाश्मानमास्थापयति ॥६॥
~~तस्याः सोदर्यो~~ आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव। अभितिष्ठ पृत
न्यतः सहस्व पृतनायत इत्यथास्या अञ्जलावुपस्तृणीते तस्याः सोदर्यो भ्राता
द्विर्लाजानावपति तानभिघार्य्य जुहोतीयं नार्युपब्रूते ग्नौ लाजानावपन्ती
दीर्घायुरस्तु मे पतिर्जीवातु शरदः शतं स्वाहेत्यथैनां प्रदक्षिणमग्निं पर्य्याणयति
तुभ्यमग्रे पर्यवहन् सूर्यां वहतुना सह। पुनः पतिभ्यो जायां दा अग्ने प्रजया

सहेति तथैव स्थापयति तथैव जुहोति । अथैनां पुनरेव पर्याणयति पुनः पत्नी
मग्निरदायुषा सह वर्चसा दीर्घायुरस्यायः पतिर्जीवतु शरदः शतमिति तथैवा
स्थापयति तथैव जुहोत्यथैनां पुनरेव पर्याणयति विश्वाउत त्वया वयं धारा
उदन्या इव । अतिगाहे महि द्विष इत्यथोप विश्यान्वारब्धायां जयानभ्यातानां
राष्ट्रभृत इति हुत्वाज्यहोमान् जुहोति प्रजापतेन त्वदेतान्यन्य इत्यथ सौविष्ट
कृतीं जुहोति यदस्य कर्मणोत्यरीरिचं यद्वा न्यूनमिहाकरं । अग्निष्टत्स्विष्ट
कृद्विद्वान्सर्वं स्विष्टं सुहुतं करोतु मे अग्नये स्विष्टकृते सुहुत हुत आहुतीनां
कामानां समर्धयित्रे स्वाहेत्यथ स्रुवेण परिधीननक्त्यथ परिस्तरणान्समुल्लुप्या
ज्यस्थाल्यां प्रस्तरवद्बर्हिरं त्वाग्नावनुप्रहरत्यथ शम्या अपोह्य तथैव परि
षिञ्चति अन्वमंस्थाः प्रासावीरिति मन्त्रान् संनमयति । अथ प्रणीताभ्यो दिशो व्युन्नीय
ब्रह्मणे वरं ददाति गां ब्राह्मणेभ्यः एष आघारवान् दर्विहोमो थापरः परिसमुह्य
पर्युक्ष्य परिस्तीर्याज्यं विलाप्योत्पूय स्रुक्स्रुवं निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं
गृहीत्वा सर्वान् मन्त्रान् समनुद्रुत्य सकृदेवाहुतिं जुहोति अग्निष्टत्स्विष्टकृत्
द्वितीयां द्विर्जुहोति द्विर्निमार्ष्टि द्विः प्राश्नात्युत्सृप्याचामति निर्लेढीत्येष आग्नि
होत्रिको थापरः परिसमुह्य पर्युक्ष्य परिस्तीर्य प्राकृतेन हविषा यावदाम्नातमाहु
तीर्जुहोत्येष पूर्वस्तत्रोदाहरन्त्याघारं प्रकृतिं प्राह दर्विहोमस्य बादरिः । आग्निहो
त्रिकं तथात्रेयः काशकृत्स्नस्तत्पूर्वतामिति तान्मिथः संसादयेदनादेशात् ॥
।७। अनुनयंत्येतमग्निमथैनां पितुरङ्कादुद्धरति गुरोर्वा येन वध्वश्चन्द्रं
वहतु पत्यायंति जना अनु । पुनस्ताः पत्नियाः देवा नयन्तु यत आगता इत्यथैनां दक्षि
णे हस्ते गृहीत्वा रथमारोप्य स्वान् गृहानानयति पूषा त्वेतो नयतु हस्तगृह्याश्विनौ
त्वा प्रवहतां रथेन । गृहानागच्छ गृहपत्नी यथासो वशिनी त्वं विदथमावदासीति
पन्थानमनुमन्त्रयते सुगं पन्थानमारुक्ष मरिष्टं स्वस्ति वाहनं । यस्मिन् वीरो न
रिष्यत्यन्येषां विन्दते वस्वि त्योषधिं वनस्पतयो नद्यो वनानीत्यनुमन्त्रयते या ओष
धयो ये वनस्पतयो या नद्यो यानि धन्वानि ये वनाः । ते त्वा वधु प्रजावतीं प्रते
मुंचन्त्वंहस इत्यथ जायामानीय स्वान् गृहान् प्रपादयति भद्रान् गृहान् सुम
नसः प्रपद्ये वीरघ्नी वीरवतः सुवीरान् । इरां वहतो घृतमुक्षमाणास्तेष्वहं
सुमनाः संविशामीत्यथैनामानडुहे चर्मण्युपवेशयतीह गावः प्रजायध्व
मिहाश्वा इह पूरुषाः । इहो सहस्रदक्षिणो रायस्पोषो निषीदत्विति । अथा
भ्याममात्यास्तोकमारायारोपयन्तेऽथ वाचं यच्छतः आनक्षत्राणामुदयादथाहो
रात्रयोः सन्धिमीक्षमाणोऽनुमन्त्रयते नीललोहितं भवतः कृत्या शक्तिर्व्यज्यते
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यतामित्यथोदितेषु नक्षत्रेषु ध्रुवमरु
न्धतीं च दर्शयति ध्रुवोसि ध्रुवक्षितिर्ध्रुवमसि ध्रुवतः स्थितं । त्वं नक्षत्राणां
मेध्यसि समापाहि पृतन्यत इति ध्रुवं सप्तर्षयः प्रथमां कृत्तिकानामरु

न्धतीं । यध्रुव तांहनन्युः षट्कृत्तिकामुख्ययोगं वहन्तीयमस्माक
मेधत्वष्टमीत्यरुन्धतीं ॥ ८ ॥ आनयत्येतमग्निमथ देवयजनो
ल्लेखनप्रभृति आप्रणीताभ्यः कृत्वा पक्वमोदनं पायसं वा याचयति
तमभ्युक्ष्याग्नावधिश्रयत्यथाज्यं निर्वपत्यथाज्यमधिश्रयत्युभयं
पर्यग्निकृत्वा मेक्षणं स्रुवं च संमार्ज्याथैनं चरुं श्रपयित्वाभिघार्यो
दंचमुद्वास्य प्रतिष्ठितमभिघारयति परिधानप्रभृत्याग्निमुखात्
कृत्वा पक्वाज्जुहोति यस्त्वा हृदा कीरिणा मन्यमान इति पुरोनुवाक्यामनूच्य
यस्मै त्वं सुकृते जातवेद इति याज्यया जुहोति अथाज्याहुतीरुपजुहोत्य
ग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाधकामः प्रपद्ये
यास्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यै तां कृणो
मि स्वाहा वायो प्रायश्चित्त आदित्य प्रायश्चित्ते प्रजापते प्रायश्चित्ते त्वं
देवानां० कृणोमि स्वाहा पक्वाद्देव स्विष्टकृतोभ्यां सौविष्टकृतं जुहोति
लाजैरितरत्र हव्यवाहमभिमातिषाहं रक्षोहणं पृतनासु जिष्णुं ।
ज्योतिष्मन्तं दीद्यतं पुरंध्रिमग्निं स्विष्टकृतमाहुवेमों स्विष्टमग्ने
अभितत् पृणाहि विश्वा देव पृतना अभिष्य । उरुं नः पन्थां प्रदि
शन्वभाहि ज्योतिष्मद्धेह्यजरं न आयुः स्वाहेति जपप्रभृति सिद्ध
माधेनुवरप्रदानादथास्या आज्यशेषेण हिरण्यमन्तर्धाय मूर्ध्नि
संस्रवं जुहोति भूः स्वाहा भुवः स्वाहा सुवः स्वाहा भूर्भुवःसुवः स्वा
हों स्वाहेत्यथैनां प्रदक्षिणमग्निं पर्याणयति ॥ १९ ॥ ॥
अर्यम्णो अग्निं परियन्तु क्षिप्रं प्रतीक्षन्तां श्वश्रुवो देवनाश्चेत्यथ श्रीमन्तमङ्गा
रसंमृष्टोपलिप्तं गन्धवन्तं पुष्पवन्तं धूपवन्तं दीपवन्तं त वन्तं साधी
वासं दिक्षु सर्पिसूत्रेन्धनप्रद्योदितमुदकुम्भादर्शोच्छिरसं प्रपाद्य
तस्मिन्नेनां संवेश्य तस्या अन्तिके जपत्युदीर्ष्वातो विश्वावसो नम
सेडा महेत्वा अन्यामिच्छ प्रपूर्व्यं संजायां पत्या सृज दीधातः पतिवती
ह्येषा विश्वावसुर्नमसा गिर्भिरीट्टे अन्यामिच्छ पितृषदं व्यक्तां सते
भागोजनुषास्य विद्धीत्यथैनामुपसंवेशयति प्रजापतिस्त्रिया यश
इत्येतया थास्या स्तोको हस्तेन योनिं विवृणोति प्रजायैत्वेति सा
यद्यश्रु कुर्यात् तामनुमन्त्रयते जीवाँ रुदन्ति विमयन्ते अध्वरे
दीर्घामनुप्रसीतिं दिधियुर्नरः वामं पितृभ्यो जनयः परिष्वज इति
॥ २० ॥ ॥ ब्राह्मणेन ब्राह्मण्यामुत्पन्नः प्रागुपनयनात्
जात इत्यभिधीयते उपनीतमात्रो व्रतानुचारी वेदानां किञ्चिद
धीत्य ब्राह्मणः एकां शाखामधीत्य श्रोत्रियोऽङ्गाध्याय्यनूचानः क
ल्पाध्याय्यृषिकल्पः सूत्रप्रवचनाध्यायी भ्रूणश्चतुर्वेदादृषिरत

ऊर्ध्वं दूवोऽथ परि कामयेत श्रोत्रियं जनयेयमित्यारंभ्य त्युपस्था
नात् कृत्वा व्रतमुपेयात् त्रिरात्रमक्षारलवणाशिना वधःशायिनौ ब्रह्मचारिणावासाते
हतानाञ्च वाससां परीधानं सायंप्रातश्चालङ्करणं मिषु प्रतोदयोश्च धारणमग्नि
परिचर्या चाचतुर्थ्यां पक्वहोमः उपसंवेशनञ्चाथ यदि कामयेतानूचानं जनयेय
मिति द्वादशरात्रमेतद्व्रतं चरेत् व्रतान्ते पक्वहोम उपसंवेशनञ्चाथ यदि कामयेत
ऋषिकल्पं जनयेयमिति मासमेतद्व्रतं चरेत् व्रतान्ते पक्वहोम उपसंवेशनञ्चाथ यदि
कामयेत भ्रूणं जनयेयमिति चतुरो मासानेतद्व्रतं चरेत् व्रतान्ते पक्वहोम उपसंवेश
नञ्चाथ यदि कामयेत ऋषिं जनयेयमिति षण्मासानेतद्व्रतं चरेत् व्रतान्ते पक्वहोम
उपसंवेशनञ्चाथ यदि कामयेत देवं जनयेयमिति सम्वत्सरमेतद्व्रतं चरेत् व्रतान्ते
पक्वहोम उपसंवेशनञ्चाथ यदा मलवद्वासा स्यान्नैनया सह संवदेत न सहासीत
नास्या अन्नमद्याद् ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्यास्तेऽथो खल्वाहुरभ्यञ्जनं वाव
(वस्त्रिया अन्न) मभ्यंजनमेव न प्रतिगृह्यं काममन्यदिति नैनामुपेयान्नारण्येन
पराचीन स्नाति नाभ्यङ्क्ते न प्रतिलिखते नांजेन दंतो धावते न नखानि निकृन्त
ते न कृणत्ति न रज्जुं सृजति न पर्णेन पिबति न खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्री
र्व्रतं चरेदञ्जलिना वापि वेदखर्वेण वा पात्रेण प्रजायै गोपीथायेति ब्राह्मणं
चतुर्थ्यां स्नातां निशायामलङ्कृत्य शयनेऽभिमन्त्रयते ॥ २१ ॥ विष्णुर्योनिं
कल्पयतु त्वष्टा रूपाणि पिंशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते । यथा
ग्निगर्भा पृथिवी द्यौर्यथेन्द्रेण गर्भिणी वायुर्यथा दिशां गर्भ एवं गर्भं दधा
तु ते । गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति । गर्भं ते अश्विनौ देवा वाधत्तां
पुष्करस्रजा । हिरण्ययी अरणी यन्निर्मंथतो अश्विना तं ते गर्भं दधाम्यहं
दशमे मासि सूतवे । नेजमेष परापत सुपुत्रः पुनरापत । अस्यै मे पुत्रकामायै
गर्भमाधेहि यः पुमानित्यथैनां परिष्वजति अमूहमस्मि सा त्वं द्यौरहं पृथिवी
त्वं सामाहमस्म्यृक्त्वं ताविहि संभवाव सह रेतो दधावहै । पुंसे पुत्राय वेत्त
वै रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेत्यात्मानं प्रत्यभिमृशते हं गर्भमदधामो
षधीनामहं विश्वेषु भुवनेष्वन्तः । अहं प्रजा अजनयन् पितृनहं जनिभ्यो अपरी
षु पुत्रानित्यथैनामुपैति तां पूषं छिवतमामेरयस्व यस्यां वीजं मनुष्या वपन्ति यात
ऊरू उशती विश्रयातै यस्यामुशन्तः प्रहरेम शेपमिति स एवमेव चतुर्थीप्रभृत्या
षोडशी मुत्तरामुत्तरां युग्मामुपैति प्रजानिःश्रेयसमृतुगमनमित्याचार्याः ।
सर्वाण्यृतुगमनानि मन्त्रवन्ति भवन्तीति वौधायनो यज्ञादौ यज्ञान्ताविति
शालीकिः ॥ २२ ॥ अथाभ्यां पञ्चमेऽहनि नापितकर्म कुर्वन्ति नामि
ताय पयोदनं दत्वा ग्रामात् प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य यत्रैकमूलमुदु
म्बरं पश्यन्ति तं प्रदक्षिणं परिसृह्य प्रदक्षिणं गन्धैरनुलिम्पन् जपति यथा त्वं
वनस्पत ऊर्जाभ्युत्थितः शतवल्शो विरोहस्येवमहं पुत्रैः पशुभिश्च सहस्रवल्शो वि

वयं रु देमेति सुमनसोऽभिप्रच्छादयति यथा त्वं वनस्पते फलवानस्येव
मह्यं पुत्रैश्च पशुभिश्च फलवन्तो भवानीत्यत्रैव त्रिवृतं नेन वलिमुपहरन्ति
मन्त्रश्चोदाहरन्ति ऊर्जस्वान्पयस्वान् पयसा पिन्वमानानस्मान् वनस्पते
प्रयसाभ्याववृत्स्वेत्यनं संस्कृत्य ब्राह्मणान् संपूज्याशिषो वाचयित्वा जानु-
दघ्नमुदकमवतीर्य प्राचीनदशेनाहतेन वाससा मत्स्यान् गृह्णतो ब्रह्म
चारिणं पृच्छतो ब्रह्मचारिन् किं पश्यसीति स पृष्टः प्रतिब्रूयात पुत्रां
श्च पशूंश्चेति। अथैतान् मत्स्यानुदुम्बरमूले वकानां वलिमुपहरति दीर्घा
युत्वाय वर्चस इति। अत्रैव निर्माल्यानि परिक्लिन्नानि वासांसि प्रतिसरं
श्च प्रतिमुच्योदुम्बरशाखायां संसृजति। अथावगाह्यान्योन्यस्य पृष्ठे
धावयित्वोदकान्तं प्रतियौति प्रतियुतो वरुणस्य पाशः प्रत्यस्तो वरुण
स्य पाशः इत्यन्योन्यमलङ्कृत्य रक्तानि वासांसि परिधायाहतानि वा
तत एति यानेन पद्भ्यां वा गृहमागत्य प्रक्षालितपाणिपाद वप आचम्य
वाग्यतो शयनमारभेते वैश्वदेवेन कर्मणा प्रतिपद्यते मासि श्राद्धेन
चापरपक्षे ॥ २३ ॥ विज्ञाते गर्भे तिष्ये पुंसवनं ब्राह्मणानन्नेन
परिविष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वाथ देवयजनोल्लेखनप्र
भृत्याग्निमुखात् कृत्वा पक्वाज्जुहोति प्रजापते तन्वं मे जुषस्व त्वष्टृ
देवेभिः सह साम इन्द्र। विश्वैर्देवैरातिभिः संरराणः पुंसां बहूनां
मातरः स्यामः स्वाहेत्यथाज्याहुतीरुपजुहोति गर्भो अस्योषधीनां
मिति तिसृभिरनुच्छन्दसं स्विष्टकृत्प्रभृत्या धेनुवरप्रदानादथास्या
आज्यशेषमास्ये प्रश्चोतयत्यस्मै देवा सोवपुषे चिकित्सतेति चतसृभि
रनुच्छन्दसं ॥ २४ ॥ प्रथमगर्भायाश्चतुर्थे मासि सीमन्तोन्न
यनं ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वाथ
देवयजनोल्लेखनप्रभृत्याग्निमुखात् कृत्वा पक्वाज्जुहोति धाता ददातु नो रयि
मिति पुरोऽनुवाक्यामनूच्य धाता प्रजाया उत राय ईश इति ~~[illegible] जुहोति~~
याज्यया जुहोत्यथाज्याहुतीरुपजुहोति धाता ददातु नो रयिं प्राचीमित्या
न्तादनुवाकस्य स्विष्टकृत्प्रभृतिमाधेनुवरप्रदानादथास्यास्त्रेण्या शलल्या
त्रिभिर्दर्भपुञ्जीलैरुदुम्बरप्रसूनैर्यवप्रसूनैरिति केशान् विभजन् सीमन्त
मुन्नयति राकामहं यास्ते राक इति द्वाभ्यामथास्यै यवप्रसूनान्यावध्नाति
यवोऽसि यवयास्मद्द्वेषो यवयारातीरित्यथैतौ वीणागाथिनौ संशास्ति
गायतमिति तावेतां गाथां गायतः सोम एव नो राजेत्याहु ब्राह्मणीः
प्रजाः विवृत्तचक्रा आसीनास्तीरेणासौ तवेति यस्यै नद्यास्तीरं संश्रिता
वसन्ति तस्यै नाम गृह्णाति अष्टमे मासि विस्नव आहुतीर्जुहोति
विलोनुकमित्येतेन सूक्तेन वलिमुपहरति वैस्नवो ह्येष मासो विज्ञायते

विष्णुर्हि गर्भस्य देवतेति हुतो व्याख्यातः ॥ २५ ॥ यथैतद्धुते वलि
हरणं विष्णवे वलिरष्टमे मासि पूर्वपक्षस्य सप्तम्यामष्टम्यां नवम्यां
दशम्यां द्वादश्यां रोहिण्यां श्रोणायाम्वा ब्राह्मणानन्नेन परिविष्य पुण्याहं
स्वस्त्यृद्धिमिति वाचयित्वाथ देवयजनोल्लेखनप्रभृत्या प्रणीताभ्यः कृत्वोपोत्था
याग्रेणाग्निं दैवतमावाहयति ॐ भूः पुरुषमावाहयामि ॐ भुवः पुरुषमावाहयामि
ॐ सुवः पुरुषमावाहयामि ॐ भूर्भुवः सुवः पुरुषमावाहयामि इत्यावाह्य परि
धानप्रभृत्याग्निमुखात् कृत्वा दैवतमर्चयत्यथैनं स्नापयत्यापो हि ष्ठा मयो
भुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमानः
सुवर्जन इत्येतेनानुवाकेन मार्जयित्वाथाद्भिस्तर्पयति केशवं दामोदरं
तर्पयामीति तर्पयित्वैतैरेव नामधेयैर्गन्धपुष्पधूपदीपैरमुष्मै नमोऽमुष्मै
नम इत्यथाहुतिं जुहोति विष्णोर्नुकमिति पुरोऽनुवाक्यामनूच्य परो
मात्रयेति याज्यया जुहोत्यथाज्याहुतीरुपजुहोति विष्णोर्नुकं तदस्य प्रियं
प्र तद्विष्णुः परो मात्रया विचक्रमे त्रिर्देवः पृथिवीति स्विष्टकृत्प्रभृति सिद्ध
माधेनुवरप्रदानादथ घृतगुडमिश्रितेन पायसेन वलिमुपहरत्यनेनामुष्मै
स्वाहेति द्वादशभिर्यथालिङ्गं वैष्णवीभिर्ऋग्यजुःसामाथर्वभिः स्तुतिभिः
स्तुवन्ति व्याहृतिभिः पुरुषमुद्वासयेदन्नशेषं पत्नीं प्राशयेत् पुमानस्यै
जायत इति विज्ञायते ॥ २६ ॥ गृह्ये प्रथमः प्रश्नः ॥ ॥ आसना
वाहनं पाद्यमर्घ्यमाचमनं तथा । स्नानं वस्त्रोपवीतञ्च गन्धपुष्पं तथैव च ।
धूपं दीपञ्च नैवेद्यं पुनराचमनं तथा । ताम्बूलोद्वासनञ्चेति उपचारास्तु
षोडश ॥ ॥ हरिः ॐ ॥ प्रथमः प्रश्नः समाप्तः ॥ ० ॥

अथ प्रहुतो जातं कुमारमभिमन्त्रयते असम्भूत इत्येतेनानु
वाकेनाथैनं स्नापयति क्षेत्रियै त्वा निरृत्यै त्वेति षड्भिरनुच्छन्दसमथैनं
स्व उपस्थ आदधात्यङ्गादङ्गात् सम्भवसि हृदयादधिजायसे । आत्मा वै
पुत्रनामासि स जीव शरदः शतमित्यथैनं मूर्धन्यभिजिघ्रति अश्मा भव परशुर्भव हिरण्य
मस्तृतं भव । पशूनां त्वा हिंकारेण ब्रह्मणाभिजिघ्राम्यसाविति नक्षत्रनामधेये
नाथास्य दक्षिणे कर्णे जपत्यग्निरायुष्मान् इति पञ्चभिः पर्यायैरापुष्टे विश्वतो दध
दित्युत्तरेऽथैनं दधि मधु घृतमिति समुदायुत्य हिरण्येन कुमारं प्राशयति
प्राणे रक्षति विश्वमेजदित्येतेनानुवाकेन प्रत्यृचमतिशिष्टं गोपदे निनयति
व्याहृतीभिरथैनं मातुरुपस्थ आदधाति सीद त्वं मातुरस्या उपस्थ इति चतसृभिः
सह साभिस्तनमभिमन्त्रयते यस्ते स्तनः शशयो यो धातवे करिति धयन्त
मनुमन्त्रयते द्यौस्ते पृष्ठं रक्षतु वायुरूरू अश्विनौ च स्तनं धयन्तः सविताभिरक्षतु ।
आवाससः परिधानाद्बृहस्पतिर्विश्वेदेवा अभिरक्षन्तु पश्चादित्यथास्योदकुम्भ

मुच्छ्रिरसि निदधाति आपः सुप्तेषु जाग्रतो रक्षांसि निरितोऽनुदध्व
मित्यथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा पक्वाज्जुहोति हरिं
हरन्तमनुयन्ति देवा इति पुरोऽनुवाक्यामनूच्य माच्छिदो मृत्यो मा
वधीरिति याज्यया जुहोत्यथाज्याहुतीरुपजुहोति सद्यश्च कमनाये
त्यान्तादनुवाकस्य स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानात् ॥२॥
अथातो युगं रथयुगं वा स्नाप्याच्छाद्यालङ्कृत्याग्रेणाग्निमुच्छ्रित्य
तस्याग्रेणाश्वत्थपर्णेषु हुतशेषं निदधाति नम आव्याधिनीभ्यः
इत्यथास्तमित आदित्ये गौरसर्षपान् फलीकरणमिश्रानञ्जलिना जुहोति
कृणुष्व पाजः प्रसितिं न पृथ्वीमित्येतेनानुवाकेन प्रत्यृचमथौदनं तिल-
सक्तुभिर्घृतेनेति समुदायुत्य गोष्ठेऽश्वत्थपर्णेषु हुतशेषं निदधात्यथ
घोराय नमो घोराय नेजमेषाय नम इत्यथातिशिष्टं सर्वा दिशः संप्र
किरन्ति आवेशिनी व्यशुमुखीः कुतूहलैकस्तनी जृम्भणी स्तम्भनी
मोहनीच कृष्णा विशाखा विमला ब्रह्मरात्रिर्भ्रातृव्य सङ्घेषु पतन्त्यमो-
घास्ताभ्यो वै मातृभ्यो नमो नम इति स एवमेव फलीकरणहोमप्रभृति
सायंप्रातर्दशरात्रं करोति नानुत्थितायां सूतिकायां भोज्यान्नता दश-
म्यामुत्थानं दशम्यां द्वादश्यां वा नामकरणं प्राजापत्येन सूक्तेन
हुत्वा ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वा
यन्नामास्मै ददाति द्व्यक्षरं चतुरक्षरं षडक्षरमष्टाक्षरं वा घोषवदा
द्यन्तरं तस्थं दीर्घाभिनिष्ठानं तमपि वा यस्मिन्स्विदुपसर्गः स्याद्दृष्टं शूकं
देवताणुकं वा यथैवैषां पूर्वपुरुषाणां नामानि स्युरयुजाक्षरं कुमार्या अमुष्मै
स्वस्तीति ॥२॥ चतुर्थे मास्युपनिष्क्रमणं ब्राह्मणानन्नेन परि
विष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वाऽथ देवयजनोल्लेखनप्रभृत्याग्नि
मुखात्कृत्वा स्वस्त्यात्रेयं जुहोति स्वस्तिनो मिमीता० स्वस्ति संबाधे
ष्वभयं नो अस्तु । स्वस्तिन इन्द्रो० बृहस्पतिर्दधातु स्वाहेत्यष्टाभिरनु-
च्छन्दसं स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानादथोपनिष्क्रम्य वाद्यानि
चित्रियाण्यभ्यर्च्य त्रिवृतान्नेन ब्राह्मणान्संपूज्याशिषो वाचयित्वा प्रद-
क्षिणीकृत्य स्वान्गृहानानयति ॥३॥ षष्ठे मास्यन्नप्राशनं
ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वाथ देवय-
जनोल्लेखनप्रभृत्याग्निमुखात्कृत्वान्नसूक्तेन जुहोति अहमस्मि प्रथ
मजा ऋतस्येत्यष्टाभिरनुच्छन्दसं स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदा
नादथौदनं दध्ना मधुना घृतेनाद्भिरिति समुदायुत्य हिरण्येन कु-
मारं प्राशयति प्राणेरक्षति विश्वमेजदिति याजाता ओषधय इति
षड्भिरनुच्छन्दसं भूर्भुवःसुवरपां त्वौषधीनां रसं प्राशयामि शिवास्त आपः

ओषधयः सन्त्विति सर्वास्वनुप्रजति ॥ ४ ॥ सम्वत्सरे चूडाकर्म्म
त्रिषु वा सम्वत्सरेषु ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धिमिति
वाचयित्वाथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा पक्वाज्जुहोति ये
केशिन इति पुरोऽनुवाक्यामनूच्य नर्त्त इति याज्यया जुहोति अथाज्याहुती
रुपजुहोति आरोह प्रोष्ठं विषहस्व शत्रूनित्यान्तादनुवाकस्य स्विष्टकृत्
प्रभृति सिद्धमाधेनुवरप्रदानादथाग्रेणाग्निमुदुम्बरपर्णेषु हुतशेषं निद
धाति नमो हिरण्यबाहव इत्यपरेणाग्निमुभयीरपः सन्नि ञ्चत्युष्णासु
शीता आनयत्युष्णेन वाय उदकेनेह्यदितिः केशान् वपत्विति ताभिरस्य
शिर उनत्त्याप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस इत्यूर्ध्वाग्रं वर्हिरनूच्छ्रय
त्योषधे त्रायस्वैनमिति क्षुरमभिमन्त्रयते ज्योक्च सूर्यं दृश इत्यथैनं स्वधितिं
तिर्यञ्चं निदधाति स्वधिते मैनं हिंसीरिति अथास्य केशान् वपति येनावपत्
सविता क्षुरेणेति प्रवपतोऽनुमन्त्रयते मा ते केशाननु ~~श्मं पुरस्तात् । आयुष्य~~
~~अग्र्यं~~ गाद्वर्च एतदित्यथैनान्समुच्चित्य दर्भस्तम्बे निदधाति तेभ्यो निधा-
नं बहुधा व्येच्छन्नित्यथैनमुष्णोदकेनाप्लावयति बलं ते बाहुवोः सविता दधा
त्विति एकशिखस्त्रिशिखः पञ्चशिखो वा यथैवैषां कुलधर्मः स्याद्यथर्षि शिखा
निदधातीत्येकेऽथैनं स्नापयाच्छाद्यालङ्कृत्य त्रिवृतान्नेन ब्राह्मणान् सम्पूज्या
शिषो वाच~~विक~~यतीति प्रहुतो व्याख्यातः ॥ ५ ॥ अथातो गर्भा
ष्टमेषु ब्राह्मणमुपनीयत गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्य
मा षोडशाद्ब्राह्मणस्य नात्यय इत्येवमेवेतरयोर्द्वाविंशतिश्चतुर्विंशतिश्चा
थापि काम्यानि भवन्ति सप्तमे ब्रह्मवर्चसकाममष्टमे आयुष्कामं नवमे
तेजस्कामं दशमेऽन्नाद्यकाममेकादशे इन्द्रियकामं द्वादशे पशुकामं त्रयो-
दशे मेधाकामं चतुर्दशे पुष्टिकामं पञ्चदशे भ्रातृव्यवन्तं षोडशे सर्वकाम
मिति । वसन्ते ब्राह्मणमुपनीयत ग्रीष्मे राजन्यं शरदि वैश्यं वर्षासु
रथकारमिति सर्वानेव वा वसन्ते ब्राह्मणानन्नेन परिविष्य पुण्याहं
स्वस्त्यृद्धिमिति वाचयित्वा कुमारं भोजयित्वा तस्य चौलवत्तूष्णीं केशानोप्य
स्नातं शुचिवाससं बद्धशिखं यज्ञोपवीतं प्रतिमुञ्चन् वाचयति यज्ञोपवीतं
परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं
यज्ञोपवीतं बलमस्तु तेज इति यज्ञोपवीतिनमप आचमय्य देव
यजनमुदानयत्यथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा पालाशीं
समिधमाज्येनाक्ताम्भ्याधापयन् वाचयत्यायुर्दा देव जरसं गृणानो घृत
प्रतीको घृतपृष्ठो अग्ने । घृतं पिबन्नमृतं चारु गव्यं पितेव पुत्रं जरसे
नयेम ए स्वाहेत्यथैनमुत्थाप्योत्तरेणाग्निं दक्षिणेन यदाश्मानमास्था
पय त्वा तिष्ठेममश्मानमश्मेव त्वं स्थिरो भव । अभितिष्ठ पृतन्यतः

सहस्व पृतनायतः इत्यथैनं संतिष्ठे वाससं दक्षोदङ् परिधापयन् वाचयति
या अकृन्तं नवयन्या अतन्वत याश्च देवीरन्तानभितोददन्त तास्त्वा देवी
र्जरसा संव्ययैं त्वायुष्मानिदं परिधत्स्व वास इति परिहितमनुमन्त्रयते
परिधत्त वाससैनं शतायुषं कृणुथ दीर्घमायुः। बृहस्पतिः प्रायच्छद्वास
एतत् सोमाय राज्ञे परिधातवाउं जरनाच्छासि परिधत्स्व वासो भवाह
ष्टीनामभिशस्तिपावा। शतञ्च जीव शरदः सुवर्चा रायश्च पोषमुपसं
व्ययस्व। परीदं वासो अधिधा स्वस्तये भूरापीनामभिशस्तिपावा। शतञ्च
जीव शरदः पुरूचीर्वसूनि चार्यो विभजासु जीवन्नित्यथैनं मौञ्जीं मेखला-
न्त्रिवृतां त्रिः प्रदक्षिणां परिव्ययन् वाचयतीयं दुरुक्तात् परिबाधमाना शर्म
वरूथं पुनती न आगात्। प्राणापानाभ्यां बलमाभरन्ती प्रिया देवीनां सुभगा
मेखलेयमिति परिवीतामनुमन्त्रयते ऋतस्य गोप्त्री तपसः परस्पी घ्नती रक्षः
सहमाना अरातीः। सा नः समन्तमनुपरीहि भद्रया भर्तारस्ते मेखले मा रिषामेति
ग्रन्थिं करोति प्राणानां ग्रन्थिरसि स मा विस्रस इति नाभिदेशेऽथास्मा अजिनं
प्रतिमुञ्चन् वाचयति कृष्णाजिनं ब्राह्मणस्य रौरवं राजन्यस्य हस्त्यजिनं
वैश्यस्य सर्वेषां वा कृष्णाजिनं मित्रस्य चक्षुर्वरुणं बलीयस्तेजो यशस्वि स्थविरं
समिद्धं। अनाहनस्य वसनं जरिष्णु परीदं वाज्यजिनं दधेहमित्यथास्मै दण्डं
प्रयच्छति पालाशं वैल्वं वा ब्राह्मणस्य नैयग्रोधं स्कन्धजमवाग्ग्रं रौहीतकं
वा राजन्यस्य वादरमौदुम्बरम्वा वैश्यस्य सर्वेषां वा वार्क्षं सोमोसि सोमथं मा
कुर्विति पालाशं ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वेति वैल्वमोजोसि ऊर्जो
मयि धेहीति वादरमूर्गस्यूर्जं मयि धेहीत्यौदुम्बरं। अहं बृहस्पतेरिवा
कीर्त्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीवस्वमृतमस्मि द्रविणं सवर्चस
मिति वार्क्षं कोनामास्यसौनामास्मीति शाट्यायनकं भथैनं दक्षिणे हस्ते
गृह्णाति यस्मिन् भूतञ्च भव्यञ्च सर्वे लोकाः समाहिताः। तेन गृह्णामि त्वामहं
प्रजापतिना त्वा मह्यं गृह्णाम्यसावित्यथैनं देवताभ्यः परिददामि सर्वेभ्यस्त्वा
देवेभ्यः परिददामि सर्वाभ्यस्त्वा देवताभ्यः परिददाम्यसावित्यथैनमुपनयति। ८।

॥ देवस्य त्वा० हस्ताभ्यामुपनये सावित्यथ कुमारः पञ्चाज्जुहोति
यश्छन्दसामृषभो विश्वरूपः छन्दोभ्योध्यमृतात् संबभूव। समेन्द्रो मेधया
स्पृणोत्वमृतस्य देवधारणो भूयासं स्वाहेत्याज्याहुतीरुपजुहोति त्रेत्रियै
त्वा निर्ऋत्यै त्वेति षड्भिरनुच्छन्दसमेवमेव ब्रह्मसूक्तेन जुहोति ब्रह्मजज्ञान
मिति षड्भिः स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानादथाग्रेणाग्निं पलाश
पर्णेषु हुतशेषं निदधाति नमोऽस्तु नीलग्रीवायेत्यत्र सावित्रव्रतं पालाशी
श्चतस्रः समिध आर्द्राः सपलाशाः सप्ररोहाः प्रादेशमात्रीरप्रतिशुष्काग्रा घृता-
न्वक्ता अभ्याधापयन् वाचयति याज्ञिकानां वा वृद्धानामन्यतमस्याग्ने व्रतपते

ति मौञ्जीं ब्राह्मणस्य ज्यां मौर्वीं राजन्यस्याऽऽवी-
सूत्रं वैश्यस्य सर्वेषां वा मौञ्जीमि

सावित्रं व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहा । वायो व्रतपते आदित्य व्रतपते
व्रतानां व्रतपते सावित्रं व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहेत्यपरेणाग्निमुदगग्रं
कूर्चं निधाय तस्मिन् प्राङ्मुख आचार्य उपविशति राष्ट्रभृदस्याचार्यासंदीमात्वद्योष
मित्यथ तस्याग्रेण कुमारो दर्भेषु प्रत्यङ्मुख उपविश्य पादावन्वारभ्याह सावित्रीं
वो अनुब्रूहीति तस्मा अन्वाहोमिति प्रतिप्रतिपद्यते तत्सवितुर्वरेण्यमित्येतां
यच्छोर्धर्चशः समस्तां व्याहृतीर्विहिताः पादादिष्वन्तेषु वा तथार्धर्चश उत्तमां कृत-
स्नाया मित्यथ कुमारः पक्वादुपादाय प्राश्नाति शरीरं मे विचर्षणं जिह्वा मे मधुमत्तमा ।
कर्णाभ्यां भूरि विश्रुवं ब्रह्मणः कोशोऽसि मेधया पिहितः श्रुतं मे गोपायेत्यथ हैके
प्राक् सावित्र्याः प्राश्नन्ति ब्रह्म वा अन्नमिति वदन्तस्तदु तथा न कुर्यान्नानुक्तायां
सावित्र्यां प्राश्नीयादिति अनुक्तायां सावित्र्यां प्राश्नीयादिति शाट्यायनकमथाप उपस्पृश्य
ज्योतिष्मत्यादित्यमुपतिष्ठते उद्वयं तमसस्परीत्यथैनं संशास्ति ब्रह्मचार्यस्यपोशान
कर्म कुरु मा दिवा सुषुप्थाः समिधमाधेहि भैक्षाचर्यं चर सदा रण्यात् समिध आहरोद
कुम्भं चाचार्याधीनो वेदमधीष्वेति स एवमेवैतत्सर्वं करोति ॥ ७ ॥ अथास्मा
अरिक्तं पात्रं प्रयच्छन्नाह मातरमेवाग्रे भिक्षस्वेति स मातरमेवाग्रे भिक्षते भवति भिक्षां
देहीति । ब्राह्मणो भिक्षेत भिक्षां भवति देहीति राजन्यो देहि भिक्षां भवतीति वैश्य-
स्तत्समाहृत्योपनिधायाचार्याय प्राह भैक्षमिदमिति तत्सुभैक्षमितीतरः प्रतिगृ
ह्णात्युत्तरेणाग्निं द्वे स्त्रीप्रतिकृती कृत्य गन्धैर्माल्येन चालङ्कृत्य त्रिवृतान्नेन ब्राह्मणान् सम्पूज्या
शिषो वाचयित्वा श्रद्धामेधे प्रीयेतामिति त्र्यहमेतमग्निं धारयन्ति क्षारलवणवर्ज
मधःशय्या ब्रह्मचर्यञ्चैतस्मिन्नेवाग्नौ व्याहृतीभिः सायम्प्रातः समिधोऽभ्यादध्यादेवमन्य-
स्मिन्नपि सदाथैनं प्रदक्षिणमग्निं परिसमूहति जूषस्व नः समिधमग्ने अद्य शोचा
बृहद्यजतं धूममृण्वन् । उपस्पृश दिव्यं सानुस्तूपैः संरश्मिभिस्ततन सूर्यस्येत्यथैनं
प्रदक्षिणमग्निं परिषिञ्चत्यदितेऽनुमन्यस्वेति दक्षिणतः प्राचीनमनुमतेऽनुमन्यस्वेति
पश्चादुदीचीनं सरस्वत्यनुमन्यस्वेति उत्तरतः प्राचीनं देव सवितः प्रसुवेति समन्तं
प्रदक्षिणं समन्तमेव वा तूष्णीं तस्मिन् व्याहृतीभिः समिधोऽभ्यादधाति भूः स्वाहा
भुवः स्वाहा सुवः स्वाहा भूर्भुवः सुवः स्वाहेति तथैव परिसमूह्य तथैव परिषि-
ञ्चत्यन्वमंस्थाः प्रासावीरिति मन्त्रान्तान् संनमयति । अथैनमुपतिष्ठते अग्ने ते इति त्रिभिः
पर्यायैर्मयि मेधां मयि प्रजामिति त्रिभिः वोढा विहितो वै पुरुषः इत्येतस्माद् ब्राह्मणादित्यथ
तिसृषु व्युष्टास्वेतमग्निमुपसमाधाय संपरिस्तीर्याग्यादाय तां दिशं यन्ति यत्रास्य पलाशः स्वष्टो
भवति तं प्रदक्षिणं परिसमूहति सुश्रवः सुश्रवसं मा कुरु यथा त्वं सुश्रवः सुश्रवा अस्येव
महं सुश्रवः सुश्रवा भूयासं यथा त्वं सुश्रवः सुश्रवो देवानां निधिगोपोऽस्येवमहं ब्राह्मणो
ब्राह्मणानां निधिगोपो भूयासमिति तस्याग्रेणाचोत्तरेण वाग्निमुपसमाधाय संपरिस्तीर्या
थाव्रत्य प्रायश्चित्ते जुहोति यन्म आत्मनो मिन्दाभूत् पुनरग्निश्चक्षुरदादिति द्वाभ्यां पालाशी
श्चतस्रः समिध आर्द्राः सपलाशाः सप्ररोहाः प्रादेशमात्रीः प्रतिशुष्काग्रा घृतान्वक्ता

अभ्याधापयन् वाचयति याज्ञिकानां वृक्षाणामन्यतमस्याग्ने व्रतपते सावित्रं व्रत
मचारिषं तदशकं तन्मे राधि स्वाहा वायो व्रतपत आदित्य व्रतपते व्रतानां
व्रतपते सावित्रं व्रतमचारिषं तदशकं तन्मे राधि स्वाहेति तथैव सुश्रवस
मभ्यर्च्य विवृताग्नेन ब्राह्मणान् संपूज्याशिषो वाचयित्वात्रैके दण्डमजिनं
मेखलां वासश्च विसृजन्त्यन्यान्यादायाथास्य वासआस्ते यत्रते प्रथम
वास्यं हराम स्तं त्वा विश्वे अनुमन्दन्तु देवाः। तं त्वा भ्रातरः सुवृधो वर्द्धमान
मनुजायन्तां बहवः सुजातमित्यधो नाभ्युपरि जान्वाच्छाद्य दण्डमजिनं मेखलां
वासश्च धारयन् श्राद्धसूतकमधुमैथुनमांसानि च वर्जयन् भैक्षाहारोऽधः-
शाय्याचार्यस्य गृहानेति विज्ञायत आचार्यो वै ब्रह्मेति ॥ ८ ॥ ० ॥
वेदमधीत्य स्नास्यन्नित्युक्तं समावर्त्तनमेतावदेव नानाथ देवयजनोल्लेखनप्रभृ
त्याग्निमुखात् कृत्वा पालाशसमिधमाज्येनाक्ता मध्यन्दिनेऽभ्यादधाति तत्पुरस्ता
द्व्याख्यातमथ केशश्मश्रुरोमनखवापनेनैव प्रतिपद्यते सिद्धमाच्छ्रादानात् कृत्वा
पक्वाज्जुहोत्यावहन्ती वितन्वाना कुर्वाणा चीरमात्मनः। वासांसि मम गावश्चान्नपाने च
सर्वदा। ततो मे श्रियमावह लोमशां पशुभिः सह स्वाहेति। अथाज्याहुतीरुपजुहो
त्यामायन्तु ब्रह्मचारिणः स्वाहा विमायन्तु० प्रमायन्तु० शमायं० यशो जने सानि
स्वाहा श्रेयान्वस्यसो सानि स्वाहा तं त्वा भग प्रविशानि स्वाहा स मा भग प्रविश
स्वाहेति स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानादथाग्रेणाग्निं बिल्वशाखायां
हुतशेषं निदधाति तस्मिन् सहस्रशाखे निभगाहं त्वयि मृजे स्वाहेत्यथ पक्वा
दुपादाय प्राश्नाति यथापः प्रवता यन्ति यथा मासा अहर्जनं। एवं मां ब्रह्मचारिणो
धातरायन्तु सर्वतः स्वाहेति प्राश्याप आचम्योरः प्रत्यात्मानं प्रत्यभिमृशते प्रतिवेशोऽसि
प्र मा भाहि प्र मा पद्यस्वेति सौ नैवास्त आनक्षत्राणामुदयादथोदितेषु नक्षत्रेषूप
निष्क्रम्य दिशमुपतिष्ठत इति सिद्धमत ऊर्द्ध्वं ॥ ९ ॥ ० ॥ यस्मिन्नग्नावुपनयति
तस्मिन् ब्रह्मचर्या तस्मिन् समावर्त्तनं तस्मिन् पाणिग्रहणं तस्मिन् गृह्याणि
गृह्याणि कर्म्माणि क्रियन्ते तस्मिन् काम्यानि तस्मिन् प्रजासंस्कारा इत्येके स एष
उपनयनप्रभृति व्याहृतीभिः समिद्भिर्हूयते। आसमावर्त्तनात् समावर्त्तनप्रभृत्या
ज्येन हूयते आपाणिग्रहणात् पाणिग्रहणप्रभृति व्रीहिभिर्यवैर्वा हस्तेनैते
आहुती जुहोत्यग्नये स्वाहा प्रजापतये स्वाहेति। सायं सूर्याय स्वाहा प्रजा
पतये स्वाहेति। प्रातरग्निहोत्रहविषामन्यतमेन जुहुयात् पर्वणि पर्वणि
चाग्नेयस्थालीपाकः स एष आधारवान् वास्यादाग्निहोत्रिको वाप्यापूर्विको
वा तेन सर्पिष्मता विद्यावन्तं ब्राह्मणां भोजयेद्यो स्यापचिततमस्तस्मा
ऋषभं ददातीत्येके तस्यानुगतस्य याप्रकृति स्तत आहरणमुपवसश्चानु
गतेऽन्यतरस्य भार्यायाः पत्युर्वापि वैकां जुहुयादयाश्चाग्नेरनभिशस्तीश्च सत्य
मित्वमया असि। अयसा मनसा धृतोयसा हव्यमूहिषे या नो धेहि भेषजं स्वाहेत्याहुती

व्याख्यातः ॥२०॥ अथ शूलगवः संवत्सरे संवत्सरे मार्गशीर्ष्यां पौर्ण
मास्यां क्रियेतापि वार्द्रायां गोष्ठे वोपतस्यास्वरण्ये गवां मध्येऽग्निमुपसमाधाय संपरि
स्तीर्य प्रणीताभ्यः कृत्वा बर्हिरादाय गामुपाकरोतीशानाय त्वा जुष्टामुपाकरोमीति
तूष्णीमित्येकेऽथैनामद्भिः प्रोक्षतीशानाय त्वा जुष्टां प्रोक्षामीति तूष्णीमित्येके तामत्रैव
प्राचीनशिरसं दक्षिणापदीं संज्ञपयन्ति तस्यै संज्ञप्तायाऽद्भिरभिषेकं प्राणाना
प्याययति तूष्णीं तूष्णीं वपामुत्खिद्य हृदयमुद्धरति प्रज्ञातानि चावदानानि
तान्येतेष्वेव शूलेषूपनह्यैतस्मिन्नेवाग्नौ श्रपयन्त्यथैनानि शूलेभ्य उपनिष्क्रिष्य
पुनः कुम्भ्यां श्रपयन्तीशानाय स्थालीपाकं श्रपयन्त्यथैनानि अभिघारितान्युद्वास्य
प्रतिष्ठितमभिघारयति परिधानप्रभृत्याग्निमुखात् कृत्वा देवतमावाहयत्या त्वा वहन्तु हरयः
सचेतसः श्वेतैरश्वैः सह केतुमद्भिः। वातजितैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम
हव्याय सर्वोमीशान आवाहयामीत्यावाह्य स्रुवेणोपस्तीर्णावघारितां वपां जुहोति सह-
स्राणि सहस्रश इति पुरोऽनुवाक्यामनूच्येशानं त्वा भुवनानामिति याज्यया जुहोत्यत्रैव
तान्यवदानानीडसूने प्रद्धिद्योहनं मांसं यूषमित्याज्येन समुद्रामुत्स मेक्षणेनोप
घातं पूर्वार्धे जुहोति ॥२१॥ ०॥ भवाय देवाय स्वाहा शर्वाय देवाय स्वाहा ईशा
नाय देवाय स्वाहा पशुपतये देवाय स्वाहा रुद्राय देवाय स्वाहा उग्राय देवाय स्वाहा
भीमाय देवाय स्वाहा महते देवाय स्वाहेत्यथ मध्ये जुहोति भवस्य देवस्य पत्न्यै स्वाहा
शर्वस्य देवस्य पत्न्यै स्वाहा ईशानस्य देवस्य पत्न्यै स्वाहा पशुपतेर्देवस्य पत्न्यै स्वाहा रुद्रस्य
देवस्य पत्न्यै स्वाहा उग्रस्य देवस्य पत्न्यै स्वाहा भीमस्य देवस्य पत्न्यै स्वाहा महतो
देवस्य पत्न्यै स्वाहेति अथापरार्धे जुहोति भवस्य देवस्य सुताय स्वाहा शर्वस्य
देवस्य सुताय स्वाहा ईशानस्य देवस्य सुताय स्वाहा पशुपतेर्देवस्य सुताय स्वाहा
रुद्रस्य देवस्य सुताय स्वाहा उग्रस्य देवस्य सुताय स्वाहा भीमस्य देवस्य सुताय
स्वाहा महतो देवस्य सुताय स्वाहेत्यथाज्याहुतीरुपजुहोति नमस्ते रुद्र मन्यव इत्या
न्तादनुवाकस्य स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानात्। अथाग्रेणाग्निमर्कपर्णेषु
हुतशेषं निदधाति यो रुद्रो अग्नौ तस्मै रुद्राय नमोऽस्तु स्वाहेति स्थालीसंक्षालन
माज्यशेषमुदकशेषञ्च पात्र्यां समानीय वेतसशाखया वोक्षन् त्रिः प्रदक्षिणं गाः
पर्येत्या गावो अग्मन्नुत भद्रमक्रन्निति सूक्तेन महत्स्वस्त्ययनमित्याचक्षतेऽथ यदि
गान्न लभते मेषमजम्वा लभते ईशानाय वा स्थालीपाकं श्रपयन्ति तस्मादेतत् सर्वं
करोति यदुक्तं कार्यं शूलगवो व्याख्यातः एवमेवाष्टम्यां प्रदोषे क्रियेतैतावदेव
नानामात्रोपाकरणं पशोः ॥२२॥ ०॥ अथ बलिहरणं सायंप्रातर्यदशनीयस्य
क्रियेतोपासने पचने वा होमः एतावदेव नाना क्षारलवणावरान्नसंसृष्टस्य तु होमं
परिचक्षते काममितरेष्वायतनेष्वथ यदेतद्देवस्यादुत्तरतो भस्ममिश्रानङ्गा
रान्निरूह्य तेषु जुहुयात् सर्वेष्वायतनेषु पाणिना परिसमुह्योभयतः परिषेकं
निदध्यात् देशाभ्यासे मन्त्राभ्यासः कामं समानस्थानेष्वेव ग्राहशो हस्तेन

20/7/20

होमो ~~करोति~~ ऽग्नये स्वाहा सोमाय स्वाहा ध्रुवाय स्वाहा ध्रुवाय भौमाय स्वाहा
ध्रुवक्षितये स्वाहा च्युतक्षितये स्वाहा ईशानाय स्वाहा जयन्ताय स्वाहा धर्म्मरूचये
स्वाहा धन्वन्तरये स्वाहा विद्यायै स्वाहाम्बिकायै स्वाहा ह रये स्वाहा गणेभ्यः स्वाहा
गणपतिभ्यः स्वाहा परिषद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा साध्येभ्यो देवेभ्यः स्वाहा
सर्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्यः स्वाहा भूः स्वाहा भुवः स्वाहा
सुवः स्वाहा भूर्भुवः सुवः स्वाहा अग्नये स्विष्टकृते स्वाहेत्युत्तरार्धपूर्वार्द्धे
परेणाग्निं धर्म्माय स्वाहा धर्म्माय स्वाहेत्यग्रेणाग्निं कण्ठे नागमात्रे
स्वाहा सर्पेभ्यः स्वाहेति ॥ २३ ॥ ॥ अंभृण्यावकाशेऽचलायै देव्यै
स्वाहा वास्तुपाल्यै सगणायै स्वाहेत्यंभृणादेशेऽद्भ्यः स्वाहा वरुणाय स्वाहेति
स्थाल्यां प्रजापतये स्वाहा परमेष्ठिने स्वाहेति देवतावकाशे [ऋषभाय स्वाहा] रुद्राय स्वाहा रुद्राण्यै
स्वाहेति मध्येऽगारस्यौषधिवनस्पतिभ्यः स्वाहा रक्षोदेवजनेभ्यः स्वाहेत्युच्छिरसि
कामाय स्वाहा भगाय स्वाहा श्रियै स्वाहा विष्णवे स्वाहेति स्थूणादेशे गृहाय स्वाहा
गृहराजाय स्वाहेति धनधान्यावकाशे धनधान्याभ्यां स्वाहा वैश्रवणाय स्वाहेति
गोसेवा पल्येवा श्रियै स्वा पुष्ट्यै स्वाहेत्युलूखलमुसलावकाशे उलूखलमुशलाभ्यां
स्वाहेति दृषदुपलावकाशे दृषदुपलाभ्यां स्वाहेति सम्मूहन्यावकाशे सम्मूहन्यै
देव्यै स्वाहेत्युत्तरपूर्वे देशेऽगारस्य गृह्याभ्यः स्वाहा सानेभ्यः स्वाहावसानपतिभ्यः
स्वाहा सर्पदेवजनेभ्यः स्वाहा सर्वभूतेभ्यः स्वाहेति द्वारमध्येऽन्तरीक्षाय स्वाहा
अवान्तरिक्षाय स्वाहेति पार्श्वयो धात्रे स्वाहा विधात्रे स्वाहेत्युपपार्श्वयोर्भूत्यै
स्वाहा प्रभूत्यै स्वाहेति संवननदेशे यदेजति जगति यच्च चेष्टति नाम्नो भागो
यन्नाम्ने स्वाहेत्यथोप निष्क्रम्य ज्येष्ठावकाशे ज्येष्ठाभ्यां स्वाहा करस्कराभ्यां स्वाहे
त्यनसि वा रथे वा श्रियै स्वाहा विष्णवे स्वाहेति गोष्ठे रुद्राय स्वाहा पशुभ्यः स्वाहा
पशुपतये स्वाहेत्यथ वास्तुमध्ये वास्तोष्पतये स्वाहा पृथिव्यै स्वाहान्तरिक्षाय
स्वाहा दिवे स्वाहा सूर्य्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहाऽद्भ्यः स्वाहौ
षधिभ्यः स्वाहा वनस्पतिभ्यः स्वाहा चराचरेभ्यः स्वाहा परिप्लवेभ्यः स्वाहा
सरीसृपेभ्यः स्वाहा देशेभ्यः स्वाहा कालेभ्यः स्वाहा लोकेभ्यः स्वाहा वेदेभ्यः
स्वाहा ऋषिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहेन्द्राय स्वाहा
बृहस्पतये स्वाहा प्रजापतये स्वाहा ब्रह्मणे स्वाहायतनवते स्वाहेत्यथ दक्षिणतः
प्राचीनावीती पितृभ्यः [स्वधानमः] स्वाहा पितामहेभ्यः स्वधानमः स्वाहा प्रपितामहेभ्य स्वधा-
नमः स्वाहेत्यथाप उपस्पृश्य यज्ञोपवीती नमो रुद्राय भगवते स्वाहेत्यथ दिक्षु
प्राच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहोदीच्यै दिशे स्वाहो
र्ध्वायै दिशे स्वाहा इत्यथावान्तरदिक्षु अग्नये स्वाहा निर्ऋत्यै स्वाहा वायवे
स्वाहेशानाय स्वाहेत्यथाकाशे उत्क्षिपन्ति, ये भूताः प्रचरन्ति दिवा वलिमिच्छन्तो
विनुदस्य प्रेष्याः। तेभ्यो वलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्ददातु स्वाहेति दिवा,

ये भू प्रचरन्ति नक्तं वलि ० तु स्वाहेति नक्तमिति ~~बलिमिच्छके~~ नक्तं संक्षालनं
प्रागुदीच्यां दिशि निनयन्ति नमो रुद्राय भौमाय स्वाहेति ॥ २४ ॥ वैश्वदेवं
हुत्वा तिथिमाकाङ्क्षेद् गोदोहनकालमग्रं चोद्धृत्य दद्याद्विज्ञायते यज्ञो वा एष पञ्चमो
यदतिथिरिति जघनेन गार्हपत्यमुपविश्य उपासनस्य वाधीहि भो इति गार्हपत्यमुक्त्वा।
प्राणायमैस्त्रिरायम्य सावित्रीं सहस्रकृत्व आवर्जयेच्छतकृत्वो परिमितकृत्वो दशावरं
वेदादीश्छन्दांसि कुष्माण्डानि चाधीयीताग्निमीळे पुरोहितमित्यृग्वेदस्येषे त्वोर्जे त्वेति
यजुर्वेदस्याग्न आयाहि वीतय इति सामवेदस्य शन्नो देवीरभीष्टय इत्यथर्ववेदस्याग्नि
मूर्द्धा दिवः इतिच्छन्दांसि यद्देवा देवहेलनमिति कुष्माण्ड्यो। यदधीते स ब्रह्मयज्ञो
यज्जुहोति स देवयज्ञो यत् पितृभ्यः स्वधा करोति स पितृयज्ञो यद्भूतेभ्यो वलिं
हरति स भूतयज्ञो यद्ब्राह्मणेभ्योऽन्नं ददाति स मनुष्ययज्ञः। एते पञ्च यज्ञाः
सन्ततिसुप्रयुक्ताः नयन्ति परमां गतिं। एतेभ्यो यस्य पञ्चभ्यो यज्ञ एकोऽपि हीयते।
मनस्वत्याहुतिस्तत्र प्रायश्चित्तं विधीयते। द्व्यहं त्र्यहं वाप्यपि प्रमादादकृतेष्वपि।
तिस्रस्त्वानुमतीर्हुत्वा चतस्रो वारुणीर्जपेत्। दशाहं द्वादशाहं वा विच्छिन्नेषु तु सर्वशः।
चतस्रोऽभ्यावर्त्तिनीर्हुत्वा कार्यस्त्वानुमतश्चरुः। यस्य स्त्री वानुपेतो वा गृहेष्वेतान्
वलीन् हरेत्। कुष्माण्ड्यस्तत्र होतव्या हुत्वा यज्ञसमृद्धयः। प्रवासं गच्छतो यस्य
गृहे कर्त्ता न विद्यते। प्रवासे कुरुते चैतान् यदन्नमुपपद्यते। न चेदुत्पद्यते चान्न
मद्भिरेतान् समापयेत्। अद्भिरेव व्रतं कुर्यात् यथालाभमनुव्रतं। पञ्चानां महतामेषां
स यज्ञैः सह गच्छति। देवानां देवयज्ञेन द्विजा गच्छन्ति सात्मतां। पितॄणां पितृयज्ञेन
भूतयज्ञेन भूतिनः। मनोर्मनुष्ययज्ञेन ब्रह्म यज्ञेन ब्रह्मणः। एतासामात्मतां गत्वा
देवतानां शतं समाः। आनन्दं ब्रह्म गच्छन्ति ध्रुवं शाश्वतमव्ययं ॥ अथास्यातिथि
र्भवति गुरोः समानवृत्ति र्वैखानसो गृहस्थो वानप्रस्थः परिव्राजको गतश्रीः स्नातको
राजा वा धर्म्मयुक्तस्तेषामभ्युत्थायासनं पाद्यमर्हणमर्घ्यम्वा प्रयुञ्जीत यास्तत्रौषधयः
सन्ति तादेया अन्याम्वा प्रक्रियां कुर्वीत सर्वेभ्योऽभ्यागतेभ्य आश्वचण्डालेभ्यः
स्वागतं कार्य्य मोषधिविभागस्तु विभववता कार्य्योऽभावे भूमिरुदकतृणानि
कल्याणी वागिति एतानि सतोऽगारे नच्छीयन्ते कदाचनेति तानेतान् परं
ब्रह्मेत्याचक्षते तेषांग्रहणे द्वादशरात्रमक्षारलवणाशिनमधःशय्या
ब्रह्मचर्य्यञ्च त्रिरात्रोपोषित उतद्वेपरपर्णो गृह्णीया द्विलिङ्गहरणं व्याख्यातं ॥ २५ ॥
॥ ० ॥ अथ प्रवरोहणं वसन्तादौ मधुश्च माधवश्चेत्यथ ग्रीष्मादौ शुक्रश्च
शुचिश्चेति हुत्वा ग्रैष्मि~~कै~~रलङ्कारै ~~हुत्वा~~ रलङ्कृत्य ग्रैष्मिकान्यन्नानि ब्राह्मणेभ्यो दत्वा-
न्नशेषं प्राश्नात्यथ वर्षादौ नभश्च नभस्यश्चेति हुत्वा वार्षिकैरलङ्कारैरलङ्कृत्य
वार्षिकान्यन्नानि ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः प्राश्नात्यथ शरदादौ विषश्चोर्जश्चेति
हुत्वा शारदिकैरलङ्कारैरलङ्कृत्य शारदिकान्यन्नानि ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः
प्राश्नात्यथ हेमन्तादौ सहश्च सहस्यश्चेति हुत्वा हैमन्तिकैरलङ्कारैरलङ्कृत्य

ति हुत्वा वासन्तिकैरलङ्कारैरलङ्कृत्य वासन्तिका-
न्यन्नानि ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः प्राश्ना

हैमन्तिकान्यन्नानि ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः प्राश्नात्यथ
शिशिरादौ तपश्च तपस्यश्चेति हुत्वा शैशिरैरलङ्कारैरलङ्कृत्य स्वलङ्कृत्य
शैशिरिकान्यन्नानि ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः प्राश्नात्यथाधिमासे
संसर्पोऽस्यंहस्पत्याय त्वेति हुत्वा चैत्रिकैरलङ्कारैरलङ्कृत्य चैत्रिकान्यन्नानि
ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः प्राश्नाति स एष आग्रयणान्वारम्भणान् वाप्यापू
र्विको वा स्यादग्निहोत्रिको वेति प्रत्यवरोहणं व्याख्यातं ॥ ० ॥ अथाष्टका
होमस्तैषे मास्यपरपक्षस्य सप्तम्यामष्टम्यां नवम्यामिति क्रियेतैवं माघ एवं फाल्गुने
यदि विहृतोपध्रुवे समस्त उपरिष्टान्माघ्याः पौर्णमास्या अपरपक्षस्य सप्तम्यामष्टम्यां
नवम्यामिति क्रियेतापि वाष्टम्यामेव श्वः करिष्यामीति ब्राह्मणान्निमन्त्रयेत योनि-
गोत्रश्रुतवृत्तसम्पन्नान् सम्बन्धानित्येके कामं सम्बन्धानपि श्रुतवृत्तसम्पन्नान्
श्रुतवृत्तयोर्हि स्वधा निधीयत इत्युपदिशन्ति तान् श्वोभूते श्मश्रुकेशकर्म्मा
भ्यञ्जनस्नानैर्यथोपपादं संपूज्य स्वयमाप्लुत्य शुचौ समे देशेऽथ देवयजनो
ल्लेखनप्रभृत्या प्रणीताभ्यः कृत्वा बर्हिरादाय गामुपाकरोति पितृभ्यस्त्वा
पितामहेभ्यस्त्वा प्रपितामहेभ्यस्त्वा जुष्टामुपाकरोमीति तूष्णीमित्येकेऽथैनामद्भिः
प्रोक्षति पितृभ्यस्त्वा पितामहेभ्यस्त्वा प्रपितामहेभ्यस्त्वा जुष्टां प्रोक्षामीति तूष्णी
मित्येके तामत्रैव प्राचीनशिरसं दक्षिणपदीं संज्ञपयन्ति तस्यै संज्ञप्तायाअद्भिरभि
षेकं प्राणानाप्याययति तूष्णीं तूष्णीं वपामुत्खिद्य हृदयमुद्धरति प्रज्ञातान्यव
दानानि तान्येतेष्वेव शूलेषूपनह्यैतस्मिन्नेवाग्नौ श्रपयन्ति पृथक् मांस्यस्थालीपाकं पूपांश्च श्रप
यन्त्यन्यांश्च विशेषान् सर्वं सिद्धं समानीयायुग्मान् ब्राह्मणान् सुप्रक्षालितपाणि-
पादान् अप आचमय्य सदर्भोपक्लृप्तेष्वासनेषु प्राङ्मुखानुपवेशयत्युदङ्मुखान् वा
स यदि प्राङ्मुखान् दक्षिणापवर्गोऽथ यद्युदङ्मुखान् प्रागपवर्गस्तेषामेवोदकं
निनयन् स प्रणवेन क्षणं ग्राहयत्यष्टकाश्राद्धे क्षणः क्रियतामित्यों तथेति प्रतिवचनं
प्राप्नोतु भवान् प्राप्नवानीति प्राप्नवानि प्राप्नवानीतीतरे प्रत्याहुरथैनांस्तिलमिश्रा
अपः प्रतिग्राहयत्यमुष्मै स्वधा नमोऽमुष्मै स्वधा नम इति त्रिस्तिलोदकमेके
समामनन्ति पुरोनं द्विस्तिलोदकं दद्याद्धुतवत्सु च तृतीयमथैनान् वस्त्रगन्ध
पुष्पधूपदीपैर्यथोपपादं सम्पूज्य पृच्छत्युद्ध्रियतामग्नौ च क्रियतां काममुद्ध्रियतां
काममग्नौ च क्रियतामितीतरे प्रत्याहुरथाभ्यनुज्ञातः परिधानप्रभृत्याग्निमुखात्
कृत्वा शृतायां वपायां पञ्च स्रुवाहुती जुहोति तत्पुरस्ताद्व्याख्यातं । त्रेधा
वपां विच्छिद्यौदुम्बर्या दर्व्या जुहोति तत्पुरस्ताद्व्याख्यातमथाष्टकाहोमान्
जुहोति इयमेव सा या प्रथमा व्यौच्छदिति पञ्चदशैरपि वाग्नौ करिष्यामीति
कुरुष्वेतीतरे प्रत्याहु — — — — — युष्टेये पूर्वतरामित्येका संवत्सरस्य प्रति-
मासमित्येका ताः सप्तदशाथापूपमष्टधा विच्छिद्य त्रीण्यवदानानि वपायाः
कलेन हुत्वाथेतराणि ब्राह्मणेभ्यो दत्वान्नैतान्यवदानानीडसूने प्रच्छिद्यौदनं

मांसं पूपमिश्राज्येन समुदायुत्यौदुम्बर्या दर्व्योपहत्य जुहोति पितृभ्यः स्वधा
नमः स्वाहा पितामहेभ्यः स्वधानमः स्वाहा प्रपितामहेभ्यः स्वधानमः स्वाहा
मातृभ्यः स्वधानमः स्वाहा पितामहीभ्यः स्वधानमः स्वाहा प्रपितामहीभ्यः
स्वधानमः स्वाहा मातामहेभ्यः स्वधानमः स्वाहा मातुः पितामहेभ्यः स्वधा
नमः स्वाहा मातुः प्रपितामहेभ्यः स्वधानमः स्वाहा मातामहीभ्यः स्वधा
नमः स्वाहा मातुः पितामहीभ्यः स्वधानमः स्वाहा मातुः प्रपितामहीभ्यः
स्वधानमः स्वाहा चार्येभ्यः स्वधानमः स्वाहा चार्यपत्नीभ्यः स्वधानमः स्वाहा
गुरुभ्यः स्वधानमः स्वाहा गुरुपत्नीभ्यः स्वधानमः स्वाहा सखिभ्यः स्वधा
नमः स्वाहा सखिपत्नीभ्यः स्वधानमः स्वाहा ज्ञातिभ्यः स्वधानमः स्वाहा ज्ञाति
पत्नीभ्यः स्वधानमः स्वाहा मात्येभ्यः स्वधानमः स्वाहा मात्यपत्नीभ्यः स्वधानमः
स्वाहा सर्वेभ्यः स्वधानमः स्वाहा सर्वाभ्यः स्वधानमः स्वाहाग्नये कव्यवाहनाय
स्विष्टकृते स्वधानमः स्वाहेति दक्षिणार्धपूर्वार्धे मांसौदनं पात्रेषूद्धृत्य विशेषा
नुपनिक्षिप्य हुतशेषेण संसृज्य दक्षिणाग्रेषु दर्भेषु सादयित्वा दक्षिणाग्रैर्दर्भैः
प्रतिच्छाद्याभिमृशति ॥ २६ ॥ ० ॥ पृथिवी ते पात्रं द्यौः पिधानं
ब्राह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा विद्यावतां प्राणापानयोर्जुहोम्यक्षितमसि
मा पितॄणां पितामहानां प्रपितामहानां क्षेष्ठा अमुत्रामुष्मिन् लोके इत्यथैतानि ब्राह्म
णेभ्य उपनिक्षिप्य ब्राह्मणस्याङ्गुष्ठेनानखेनानुदिशति अमुष्मै स्वधानमोऽमुष्मै स्वधा
नम इति भुञ्जानान् समीक्षते प्राणे निविष्टोऽमृतं जुहोमीति पंचभिः पर्यायैर्ब्रह्मणि
म आत्मामृतत्वायेत्यात्मानं नचात ऊर्ध्वं निरीक्षते — काह्रि पितर इति विज्ञायते सर्वैः
कामैस्तर्पयन् स्वधामुक्तानि ब्रह्मणान्यभिश्रावयन् रक्षोघ्नानि च नैर्ऋतानि च तृप्यन्त
तृप्ताः स्थेत्युक्त्वा तृप्ताः स्म इतीतरेषां प्रतिवचनं तृप्तेषूच्छिष्टसमीपेष्वन्नशेषात् संप्र
किरति ये अग्निदग्धा जाता जीवा येप्यदग्धाः कुले मम । भूमौ दत्तेन तृप्यन्तु
तृप्ता यान्तु परां गतिमित्यथैनान् संक्षालनेनावकीर्य दक्षिणाभिराराधयति सुवर्ण-
हिरण्यपात्र वस्त्रलोहभूमिभाण्डगोअश्वाजाविक हस्तिदासपुरुषव्रीहियवमाष
तिलदण्डोपानच्छत्र कमण्डलुयानासनशयनोपधानैः सर्वोपकरणैः यथोपपादं
संपूज्याचार्यं वाचयित्वोपसंगृह्य स्वधां वाचयित्वोत्थाप्य प्रसाद्य संसाद्य प्रदक्षिणीकृत्वा
शेषमनुज्ञाप्यैतेनैव यथेतमेत्यान्नशेषान्निवेदयते यथा ते ब्रूयुस्तथा कुर्यात्तैस्त्वभ्यनु-
ज्ञेयमथाभ्यनुज्ञातो दक्षिणेनाग्निं दक्षिणाग्रान् दर्भान् संस्तीर्य तेष्वन्नशेषैः पिण्डान्
ददाति पितृभ्यः स्वधानमः पितामहेभ्यः स्वधानमः प्रपितामहेभ्यः स्वधानमः
मातृभ्यः स्वधानमः पितामहीभ्यः स्वधानमः प्रपितामहीभ्यः स्वधानमः मातामहेभ्यः
स्वधानमः मातुः पितामहेभ्यः स्वधानमः मातुः प्रपितामहेभ्यः स्वधानमः मातामहीभ्यः
स्वधानमः मातुः पितामहीभ्यः स्वधानमः मातुः प्रपितामहीभ्यः ० आचार्येभ्यः ०
आचार्यपत्नीभ्यः ० गुरुभ्यः ० गुरुपत्नीभ्यः ० सखिभ्यः ० सखिपत्नीभ्यः ० ज्ञातिभ्यः ०

ज्ञातिपत्नीभ्यः० अमात्येभ्यः स्व० अमात्यपत्नीभ्यः० सर्वेभ्यः० सर्वाभ्यः
स्वधा नम इत्यथैनान् संक्षालनेन त्रिरपसलैः परिषिञ्चति ऊर्जं वहन्तीरमृतं
घृतं मधु पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄंस्तृप्यत तृप्यत
तृप्यतेति जपप्रभृति सिद्धमाधेनुवरप्रदानादाचमने चाग्निमुखे चाभिश्रावणे चोप
संग्रहणेषु च वैश्वदेवेषु च पश्चाद्धोमेषु च यज्ञोपवीतमन्यत्र प्राचीनावीतमेवमेव
श्वोभूते मांसशेषेणैवमेव श्वोभूते यदि त्र्यह मथ यदि गां न लभते मेषमजं वा
लभते आरण्येन वा मांसेन यथोपपन्नेन खड्ग मृग मेष महिष वराह पृषत् शश-
सार्दु त्तित्तिरि कपोत कपिञ्जल वाध्रीणसानां मथाज्यं तिलमधु संसृष्टं तथा
मत्स्यस्य शतवलेः क्षीरौदनेन वा सूपौदनेन वा यद्वाभवन्त्यामैर्वा मूलफलैर्वा
प्रदानमात्रं हिरण्येन वा प्रदानमात्रमपि वा गोग्रासमाहरेदपि वानूचानेभ्य
उदकुम्भमाहरेदपि वा श्राद्धमन्त्रानधीयीतापि वारण्येऽग्निं कक्षमुपोषेदेषा
मेकाष्टकेति नत्वेवानष्टकः स्यात् सिकताः श्राद्धे पवित्रं यद्यध्यासनायं
यद्यवकिरणाय कुशाः कुतपा दूर्वा इति श्राद्धे पवित्रं यद्यासनाय यदि
परिस्तरणाय यद्युत्सवनाय तिलाः श्राद्धे पवित्रं यदि दानाय यदि भोजनाय
यद्यपां संसर्गाय खड्गः श्राद्धे पवित्रं यदि मांसं यद्यस्थिमयं पात्रं दौहित्र-
श्राद्धे पवित्रं यदि भोक्ता यदि परिवेष्टा यद्यभिश्रावयत इत्यष्टकाहोमो
व्याख्यात एवमेव मासिश्राद्धमपरपक्षस्याष्टमीप्रभृति चतुर्दशीं वर्जयित्वा
यतमेऽहनि क्रियेतैतावदेव ? नानंनात्राष्टका होमा भवन्तीमाः सप्त पाक-
यज्ञसंस्था व्याख्याताः ॥ २७ ॥ ॥ इति द्वितीयः प्रश्नः ॥ ० ॥

हरिः ॐ ॥ ० ॥

---

हुतानुकृतिरुपाकर्म श्रावण्यां पौर्णमास्यां क्रियेतापि वाषाढ्यां
समन्वारब्धेष्वन्तेवासिषु अथ देवयजनोल्लेखनप्रभृत्याग्निमुखात् कृत्वा चतस्रः
प्रधानाहुतीर्जुहोति याज्ञिकीभ्यो देवताभ्यः स्वाहा सांहिवीभ्यो देवताभ्यः स्वाहा
वारुणीभ्यो देवताभ्यः स्वाहा सर्वाभ्यो देवताभ्यः स्वाहा इत्यथ काण्डऋषीन्
जुहोति प्रजापतये काण्डऋषये स्वाहा सोमाय काण्डऋषये स्वाहाग्नये काण्ड
ऋषये स्वाहा विश्वेभ्यो देवेभ्यः काण्डऋषिभ्यः स्वाहा स्वयम्भुवे काण्डऋषये
स्वाहेत्यथ सदसस्पतिं जुहोति सदसस्पति० सिष० स्वाहेत्यथ सावित्रीं
जुहोति तत् सवितुर्वरेण्यमित्येतामथ वेदाहुतीर्जुहोति ऋग्वेदाय स्वाहा यजु
र्वेदाय स्वाहा सामवेदाय स्वाहाथर्ववेदाय स्वाहाथर्वाङ्गिरोभ्यः स्वाहेतीहास
पुराणेभ्यः स्वाहा सर्पदेवयजनेभ्यः स्वाहा सर्वभूतेभ्यः स्वाहेति त्रीनादितोऽ
नुवाकानधीयीरन् काण्डादीन् वा सर्वान् स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदा
नादथ ब्राह्मणांस्तर्पयत्यपूपैर्धानाभिः सक्तुभिरोदनेनेति यद्युवै तेभ्यो भवति

ऋषयश्छन्दांसि आचार्या वेदा यज्ञाश्च प्रीयन्तामितिवाचयित्वा त्र्यहमेकाहं वा नाधीयीरन्
मासं प्रदोषे नाधीयीरन् नित्यश्चैवमुक्तोर्द्ध्वं मध्यरात्रात्स्तमिते सप्रदोष मह रनध्यायो
स्तमिते चोरयाद्विद्युति च स्वप्नान्तमेव काण्डोपाकरण काण्डसमापनाभ्यां स एकः
काण्ड ऋषिस्तस्य चैवैकस्य काण्डस्याद्योऽनुवाकस्तस्य चैवैकस्य काण्डस्यैतदह
रनध्याय एवं काण्डविसर्गे एतावदेव नानात्रानुवाकाः पौरोडाशिकं याजमानं
हौतारो हौत्रं पितृमेध इति सब्राह्मणानि सानुब्राह्मणानि प्राजापत्याध्वरिकं
ग्रहादाच्छिणा[illegible]नि सन्मिष्टयजूंषि अवभृथयजूंषि वाजपेयः शुक्रियाणि सव्याहृति
सब्राह्मणानि सानुब्राह्मणानि सौम्यान्यग्न्याधेयमग्निहोत्रमग्न्युपस्थानमग्निचयनं
सावित्रं नाचिकेतं चातुर्होत्रं वैश्वसृजमारुणकेतुकमिति सब्राह्मणानि सानुब्राह्म
णानि अग्न्याधेयानि राजसूयः पशुबन्धा इष्टयो नक्षत्रेष्टयो दिवश्येनयो याज्याः
सान्नाय्यणमुपहोमाः कौकिलीसूक्तान्यौपानुवाक्यं याज्याश्वमेधः पुरुषमेधः
सौत्रामण्यच्छिद्राणि पशुहौत्रमुपनिषद इति सब्राह्मणानि सानुब्राह्मणानि
वैश्वदेवानि स्वायम्भुवं काण्डं काठके पठितो विधिः स्वयम्भूश्चात्र दैवतं सर्वभूत
पतिः शुचिरिति अथ कारीरीव्रतं चतूरात्रं मक्षारालवणं भूमौ भुञ्जीत पशुवदेव
मेव कारीरी व्रतं सावित्रीभ्यः प्रभृत्यौषध्यनुवा --- नात्र भूमौ भुञ्जीत न पशुवदिति ॥
॥ २१ ॥ ॥ मौञ्जीदण्डोपवीतञ्च वासः कृष्णाजिनन्तथा । पूर्वेऽपियुक्तान्युत्सृज्य
धार्याणि स्युर्व्रते व्रते ॥ आचार्यःप्रसूतः कर्म्माणि करोति विज्ञायत आचार्यो वै ब्रह्मेति
यस्तूपनीय मन्त्रब्राह्मणमध्यापयेत स आचार्यो यस्त्वेकदेशं स उपाध्यायः काण्डकाण्डे
व्रतचर्य्यार्थमानि ब्राह्मणानि साम्वत्सरिकैर्व्रतैरध्येयानि भवन्ति होतारः शुक्रियाणि
उपनिषदो गोदानं संमितमिति होतृषु प्रधानकालेष्वथ देवयजनोल्लेखनप्रभृत्या
ग्निमुखात् कृत्वा यथोपदेशं प्रधानाहुतीर्जुहोति याज्ञिकीभ्यो देवताभ्यो होतृभ्यः
स्वाहा सांहितीभ्यो देवताभ्यो होतृभ्यः स्वाहा वारुणीभ्यो देवताभ्यो होतृभ्यः स्वाहा सर्वाभ्यो
देवताभ्यो होतृभ्यः स्वाहेत्यथ काण्ड ऋषीन् जुहोति प्रजापतये काण्ड ऋषये स्वाहेत्यथ
सदसस्पतिं जुहोति सदसस्पति॰ सिषं स्वाहेति अथ सावित्रीं जुहोति तत्सवितु
र्वरेण्यमित्येतामथ वेदाहुतीर्जुहोत्यृग्वेदाय स्वाहा यजुर्वेदाय स्वाहा सामवेदाय स्वाहा
थर्ववेदाय स्वाहाथर्वाङ्गिरोभ्यः स्वाहेतिहासपुराणेभ्यः स्वाहा सर्वदेवजनेभ्यः स्वाहा सर्वेभ्यो
भूतेभ्यः स्वाहेति पालाशीश्चतस्रः समिध आर्द्राः सपलाशाः सप्रातोदाः प्रादेशमात्रीरप्रति-
शुष्काग्रा घृतान्वक्ता अभ्याधापयन् वाचयति पाक्षिकानाम्वा वृक्षाणामन्यतमस्याग्ने व्रतपते
होतारं व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहा वायो व्रतपते॰ आदित्य व्रतपते॰
व्रतानां व्रतपते होतारं व्रतं चरिष्यामि तन्मे राध्यतां स्वाहेति । अत्रानुवाकानध्यापयीत
स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानात् ॥ २ ॥ ॥ संवत्सरमेतद्व्रतं चरेत्
संवत्सरं हि व्रतं नातीत्येतस्मिन्नेवैतत् संवत्सरेऽधीयीत यद्युवा एतस्मिन् संवत्सरे नाधी-
यीत यावदध्ययनमेतद्व्रतं चरेत् । अथ संवत्सरे पर्य्यागतेऽध्यापयते श्रावयते वाथ

देवयज[नोल्लेख]नप्रभृत्याग्निमुखात्कृत्वाथाव्रत्यप्रायश्चित्ते जुहोति यन्म आत्मनो मिन्दा
भूत् पुनरग्निश्चक्षुरदादिति द्वाभ्यामथ यथोपदेशं प्रधानाहुतीर्जुहोति याज्ञिकीभ्यो
देवताभ्यो होतृभ्यः स्वाहेति चतस्रः प्रजापतये काण्ड ऋषये स्वाहा सदसस्पति०
सिषँ स्वाहेति सावित्री वेदाहुतीरिति नव पालाशीश्चतस्रः अन्यतमस्याग्ने व्रतपते
होतारं व्रतमचारिषं तदशकं तन्मे राधि स्वाहेति चतस्रः स्विष्टकृत्प्रभृति सिद्ध
माधेनुवरप्रदानादत्र शुक्रियाणि ॥ ३ ॥ शुक्रियव्रतमुदगयने पूर्वपक्षे
पुण्ये नक्षत्रे देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा पक्वाज्जुहोति याज्ञिकीभ्यो
देवताभ्यः स्वाहेति चतस्रः सोमाय काण्ड ऋषये इत्याद्या एकादश नात्र समि-
दाहुतीर्बलिप्राशनमिति सिद्धमपराह्णे वान्तरदीक्षाकर्मोक्तं भवति ॥ ४ ॥
अत्र शुक्रियाणि तेषामुक्तचरणं व्रतोपचर्या संवत्सरं ह्येतेनाधीत्यैतस्मिंस्त्वेवं
संवत्सरेऽधीयीत यद्युवा एतस्मिन् संवत्सरे नाधीयीत यावदध्ययनमेतद्
व्रतं चरन् संवत्सरे पर्य्यवेतेऽध्यापयते वाथ देवयज[नोल्लेख]नप्रभृत्याग्निमुखात्
कृत्वा यथोपदेशं प्रधानाहुतीर्जुहोति याज्ञिकीभ्यो देवताभ्योऽग्नये स्वाहा ०
त्यथ काण्ड ऋषिर्जुहोत्यग्नये काण्ड ऋषये स्वाहेति अथ सदसस्पतिं जुहोति
सदसस्पतिमद्भुतं० षमित्यथ सावित्रीं जुहोति तत्सवितुर्वरेण्यमित्येतामथ
वेदाहुतीर्जुहोत्यृग्वेदाय० सर्वभूतेभ्यः स्वाहेति पालाशीश्चतस्रः समिध आर्द्राः
सपलाशाः सप्ररोहाः प्रादेशमात्रीरविशुष्काग्रा घृताभ्यक्ता अभ्याधापयन्
२७।२।८ वाचयति याज्ञिकानां वा वृक्षाणामन्यतमस्याग्ने व्रतपते आग्नेयं व्रतं चरिष्यामि तच्छकेयं०
स्वाहेति जयप्रभृति सिद्धमाधेनुवरप्रदानात् संवत्सरमेतद्व्रतं चरेत् संवत्सरे
हीनातीत्येतस्मिन्नेव संवत्सरेऽधीयते यद्युवा एतस्मिन् संवत्सरे नाधीयीत याव
दध्ययनमेतद्व्रतं चरन् संवत्सरे पर्य्यवेक्षतेऽध्यापयते श्रावयते वाथ देवयजनो
ल्लेखनप्रभृत्याग्निमुखात्कृत्वा व्रत्यप्रायश्चित्तं जुहोति यन्म आत्मनो मिन्दाग्निश्चक्षु
रदादिति द्वाभ्यां । यथोपदेशं प्रधानाहुतीर्जुहोति याज्ञिकी० इति पालाशीश्चतस्रः
समिधः० मन्यतमस्याग्ने व्रतपते आग्नेयव्रतमाचरिषं तदशकं तन्मे राधि
स्वाहा० इति जयप्रभृति सिद्धमाधेनुवरप्रधानात् संवत्सरमेतद्व्रतं चरेत् ॥ ४ ॥
॥ ० ॥ अथोपनिषत्सु अथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा
यथोपदेशं प्रधानाहुतीर्जुहोति याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा०
सर्वाभ्यो देवताभ्य उपनिषद्भ्यः स्वाहेत्यथ काण्ड ऋषिं जुहोति विश्वेभ्यो देवेभ्यः
काण्ड ऋषिभ्यः स्वाहेत्यथ सदसस्पतिं जुहोति सदसस्पतिं० सिषं स्वाहे
ति अथ सावित्रीं जुहोति तत्सवितुर्वरेण्यं मित्येतामथ वेदाहुतीर्जुहोति
ऋग्वेदाय स्वाहा यजुर्वेदाय सामवेदायाथर्ववेदायाथर्वाङ्गिरोभ्यः सर्पदेवयजनेभ्यः
सर्वभूतेभ्यः स्वाहेति पालाशीश्चतस्रः समिध आर्द्राः सपलाशाः सप्ररोहाः ०
अग्ने व्रतपते उपनिषदं व्रतं चरिष्यामि ० व्रतानां व्रतपते उपनिषदं व्रतं चरिष्यामि

तच्छकेयं तन्मे राध्यतां स्वाहेति जयप्रभृति सिद्धमाधेनुवरप्रदानात् ॥ ५ ॥ ० ॥
संवत्सरमेतद्व्रतं चरेत् संवत्सरं हि व्रतं नातीति तस्मिंस्त्वेवैतत्संवत्सरेऽधीयीत
यद्युवा एतस्मिन् संवत्सरे नाधीयीत यावदध्ययनमेतद्व्रतं चरेत् अथ संवत्सरे पर्या
गतेऽध्यापयते श्रावयते वाथ देवयजनोल्लेखनप्रभृत्याग्निमुखात् कृत्वा व्रत्यप्रायश्चित्तं
जुहोति यन्म आत्मनो मिंदाभूत् पुनरग्निश्चक्षुरदादिति द्वाभ्यामथ यथोपदेशं प्रधा
नाहुतीर्जुहोति याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा सावित्रीवारुणी सर्वाभ्यो
देवताभ्य उपनिषद्भ्यः स्वाहेत्यथ काण्ड ऋषिं जुहोति विश्वेभ्यो देवेभ्यः काण्ड -
ऋषिभ्यः स्वाहेत्यथ सावित्रीं जुहोति तत्सवितुर्वरेण्यमित्येतामृग्वेदायेत्याद्यष्टौ
पालाशीश्चतस्रः ० अग्ने व्रतपत उपनिषदं व्रतमचारिषं तदशकं तन्मे राधि स्वाहा वायो ०
आदित्य ० व्रतानां ० जयप्रभृति सिद्धमाधेनुवरप्रदानात् ॥ ६ ॥ ० ॥ षोडशे वर्षे
गोदानं तस्य चौलवत्तूष्णीं प्रतिपत्तिरवसानं चैतावदेवतानां प्रतिपत्तौ सर्वान् केशान्
वापयते गामत्र गुरवे वरं ददाति अग्निगोदानो वा भवति तस्य काण्डोपाकरण काण्ड
समापनाभ्यां प्रतिपत्तिरवसानञ्च सर्ववेदसंमितः संमितमित्याचक्षते तस्य द्वादश
संवत्सरानेकादश नव सप्त त्रीन् संवत्सरान् षण्मासांश्चतुरो मासान् द्वौ मासौ मासम्वा
व्रतं चरेत् तस्योपदेशात् प्रतिपत्तिरवसानञ्च तस्य नित्ये धि ब्रह्मचर्यं त्रिषवणमभिषेको
छिन्नशय्यामासनञ्च यन्मातुर्दुश्चरितं तस्मादेनं त्रायत इत्युपदिशन्ति मन्त्रब्राह्मणं वेद
१।२।० इत्याचक्षते ~~तस्य संक्षेपः~~ मन्त्रब्राह्मणयोर्वेदनामधेयं ॥ ७ ॥ ० ॥ अष्टाचत्वा
रिंशत् संमितमित्याचक्षते तस्य संक्षेपः संवत्सरं संवत्सरं व्याख्यास्यामः स यदि ब्रह्मचारी
स्यान्नियममेव प्रतिपद्येताथ यद्यब्रह्मचारी स्यात् केशश्मश्रुलोमनखानि वापयित्वा तीर्थं
गत्वा स्नात्वाप आचम्य सुरभिमत्याब्लिङ्गाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिर्व्याहृ
तीभिरिति मार्जयित्वाथान्तर्जलगतोऽघमर्षणेन त्रीन् प्राणायामान् धारयित्वोत्तीर्य वासः
पीडयित्वान्यत् प्रयतं वासः परिधाया [प्रत्याचम्या] थ देवयजनोल्लेखनप्रभृत्याग्निमुखान् कृत्वाथ व्रत्य
प्रायश्चित्ते जुहोति नाहं करोमि [नाहंकर्ता कामः करोति] कामः कर्ता कामः कारयितैतत्ते काम कामाय स्वाहा
नाहं करोमि [नाहंकर्ता] मन्युः करोति मन्युः कर्ता मन्युः कारयिता एतत्ते मन्यो मन्यवे स्वाहेति यथो
पदेशं प्रधानाहुतीर्जुहोति याज्ञिकीभ्यो देवताभ्यः संमितेभ्यः स्वाहा सांहितीभ्यो देवताभ्यः
संमितेभ्यः स्वाहा वारुणीभ्यो देवताभ्यः संमितेभ्यः स्वाहा सर्वाभ्यो देवताभ्यः संमितेभ्यः
स्वाहेति । अथ काण्ड ऋषिं जुहोति स्वयम्भुवे काण्डऋषये स्वाहेति अथ सदसस्पतिं ०
सिषं स्वाहेति अथ सावित्रीं जुहोति तत्सवितुर्वरेण्यमित्येतामथ वेदाहुर्जुहोत्यृग्वेदाय ०
भूतेभ्यः स्वाहेति चतस्र उदुम्बरीः समिधोऽप्रतिधुष्काग्रा घृतान्क्त्वा अभ्याधापयन्
वाचयति याज्ञिकानां वा वृक्षाणामन्यतमस्याग्ने व्रतपतेऽष्टाचत्वारिंशत् संमितं व्रतं
चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहा वायो व्रतपते ० आदित्य व्रतपते ० व्रतानां
व्रतपते ० जयप्रभृति सिद्धमाधेनुवरप्रदानात् । एवमेव व्रतान्ते व्रतमचारिषमिति
अधो नाभ्युपरि जान्वाच्छाद्य त्रिषवणमुदकं स्पृशन्नग्निपक्ववृत्तिरच्छायोपयोगी नागारं

प्रविशत् दन्यदुक्तनियोगाद्भैक्षं तात्विकं भुञ्जीत कामं कन्दमूलफलं मपराह्णे प्रसिद्धमुप
स्पृश्य तद्भयिनोपयुञ्जीत स्त्रीशूद्रपतितरजस्वलाभिश्च नसम्भाषीत कामं मातरमुपा
ध्यायिनीश्च याश्चान्या एवं युक्ता स्त्रियोऽशक्ताः पराक्रमे सप्रणवा व्याहृतयः प्राणायामा
ग्नीन्धनभैक्षचरणस्थानासनसवनोपस्पर्शन सुमनसो निवेदनानि च सर्वाः संमित-
देवताः तर्पयति ब्रह्माणं तर्पयामि प्रजापतिं तर्पयामि परमेष्ठिनं तर्पयामि स्थाणुं०
शिवं० शर्वं० बहुरूपं० स्कन्दं० इन्द्रं० यमं ऋषीन्० सर्वाः संमितदेवतास्तर्पयामीति
प्रसंख्याय समाप्नुयाद्गुरवे दक्षिणामाहरेद् गुरोः समानवृत्तिर्गुरुवद्वृत्तिः स्यात्
प्रोषितस्तदेव प्रतिपद्येतान्यत्र पातकादेवं द्वादश संवत्सरान् एकादश नव सप्त त्रीन्वा
संवत्सरं षण्मासांश्चतुरो मासान् द्वौ मासौ मासं वा व्रतं चरेदपि वा योऽनूचानः
श्रोत्रियः स द्वादशरात्रं ^(पराकं) व्रतं चरेदन्तेवासं मितीस्यात् स एष चरति दश पूर्वान्
दशापरानात्मानञ्चैकविंशतिं पंक्तिं च पुनाति यस्यामुपविशति यस्मै ददाति यस्माच्च प्रति
~~गृह्णीयात्~~ गृह्णाति तत् सर्वं पुनाति व्रतसमाप्तौ वेदसमाप्तौ वा गुरवे दक्षिणामाहरेद्
धर्मतो यथाशक्ति विषमगतेत्वाचार्य उग्रतः शूद्रतो वाऽऽहरेत् सर्वतो वोग्रतः शूद्रतो
वाप्याचार्यार्थं धर्म्यमित्येके । एतेन धान्वन्तरशैव बहुरूप पार्षद स्कन्देन्द्राणां व्रतानां
समापनं । ब्रह्माभ्यसेदृक्साम यजुर्वाच्छन्दसमनुसवनं लभेत काममिति ह स्माह
बौधायनः ॥ ८ ॥ ॥ प्रहुतानुकृतिर्वास्तुशमनं स यत्र दशोषित्वा
प्रयास्यन् भवति दशभ्यो वोर्द्ध्वं सदारः साग्निहोत्रः तद्वास्तोष्पतीयं हुत्वा प्रयातीति
सर्व एवाहिताग्निरित्येके यायावर इत्येके यज्ञागारं कारयित्वा प्रथममध्यवस्ये
त्तद्वास्तोष्पतीयेन शमयित्वाध्यवस्येत्तदु हैके यजुषा स्थूणा उच्छ्रयन्ति यजुषा
वंशं यजुषा छन्दांसि यजुषा द्वारदेशं यजुषा मध्यं यजुषा तृणं यजुषा तल्पदेशं
यजुषाग्निनिधानं स य द्युहैवं कुर्याद् यथा यजुषोच्छ्रीयते सदस्यृक्सामयजूंष्या
थर्वणाङ्गिरसानि मिथुनीभवन्तीति तदध्यवस्येद् यथा मिथुनीसम्भवं तावध्य
वस्येत्तादृक् तद्यदि यजुष्कृतं स्यादाधयो व्याधयो ग्रहा उपसर्गाश्चाप इन्युस्तस्मात्
तूष्णीं कारयित्वा द्वारदेशानलङ्कृत्य वास्तुमध्यं विमायं भृणं पूरयित्वा तल्पदेशं
कल्पयित्वोत्तरपूर्वदेशेऽगारस्य गृह्याग्निमुपसमाधाय संपरिस्तीर्याग्निमुखात् कृत्वा
पक्वाज्जुहोति वास्तोष्पते प्रतिजानीह्यस्मानिति पुरोऽनुवाक्यामनूच्य वास्तोष्पते
शग्मया संसदा त इति याज्यया जुहोति । अथाज्याहुतीरुपजुहोति वास्तोष्पते ध्रुवा
स्थूणाँ सत्रं सोम्यानां द्रप्सो भेत्ता पुराँ शश्वतीनामिन्द्रो मुनीनां सखा स्वाहा गृह्यं
भयं यदि च द्विपात्सु यदि चेच्चतुष्पात्सु भयं यदस्याग्निर्यविष्ठः प्रणुदतु तद्भयं
शन्नः प्रजाभ्यः शमुनः पशुभ्यः स्वाहा अक्षिस्पन्दे कर्णध्वनने च यद्भयं यद्वाशिते
यदु चेद्रुरुते । अग्निर्यविष्ठः० दुःस्वप्ने पापस्वप्ने च यद्भयं स्वप्नासने
यदमेध्यदर्शने । अग्निर्यविष्ठः० वास्तोष्पते प्रतरणो० स्व स्वाहा अमी
वहा वास्तोष्पते० धित स्वाहा स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानादथा

ग्रेणाग्निं दर्भस्तम्बेषु हुतशेषं निदधाति नमो रुद्राय वास्तोष्पतये आयने विद्रवण
उद्याने यत् परायणे। आवर्तने विवर्तने यो गोपायति तं हुव इति स्थालीसंक्षालन
माज्यशेषमुदकशेषं पात्र्यां समानीयोदुम्बर्य्या शाखया पलाशशाखया शमीशाखया
दर्भमुष्टिना वा सर्वतः पर्युक्ष्य त्रिः प्रदक्षिणमगारं पर्य्येति त्वं विप्रस्त्वं कविस्त्वं
विश्वारूपाणि धारयन् । अपजन्यं भयं नुदेत्यन्नं संस्कृत्य ब्राह्मणान् सम्पूज्याशिषो
वाचयेच्छिवं वास्तु शिवं वास्तु इति वास्तुशमनं व्याख्यातं ॥ १९ ॥ ० ॥
अथ यद्यगारे स्थूणा विरोहेत् कपोतो वागारमध्ये निपतेद् वायसो वा गृहं प्रविशेद् गौर्वा
गाधयेद् गौरात्मानं प्रतिधयेदनड्वान्वा दिवमुल्लिखेदनग्नौ वा धूमो जायेतानग्नौ वा दीप्येत
मधु वा जायेत वल्मीकं वोपजायेत छत्राक निर्य्यासं वोपजायेत मण्डूकं वा वा भृणे शये - त
शुनी प्रसूतौ वा श्वा वा गृहमारोहेत् सद्वा गृहपतिर्जायाक्षोपतयेदन्येष्वाद्भुतोत्पातेषु अथ
देवयजनोल्लेखनप्रभृत्याग्निमुखात् कृत्वा पक्वाज्जुहोति यत इन्द्र भयामहे स्वस्तिदा विशस्पति
रिति पुरोऽनुवाक्यामनूच्य याज्यया जुहोति । अथाज्याहुतीरुपजुहोति वास्तोष्पते
शं न इन्द्राग्नी कया नश्चित्र आभुवदको अद्य युंके भवतं नः समनसाविति स्विष्टकृत्
प्रभृति सिद्धमाधेनुवरप्रदानाद् याथाग्रेणाग्निं शमीपर्णेषु हुतशेषं निदधाति शंनो देवी
रभीष्टय इति स्थालीसंक्षालनमाज्यशेषमुदकशेषञ्च पात्र्यां समानीय तेषूत्पातेषु
निनयेत् प्रोक्षेत वा तच्छंयोरावृणीमह इति अन्नं संस्कृत्य ब्राह्मणान् सम्पूज्याशिषो
वाचयित्वा शिवं शिवमित्यद्भुतो व्याख्यातः ॥ २० ॥ ॥ आहुतानुकृतिरायुष्य-
चरुः संवत्सरे संवत्सरे षट्सु षट्सु मासेषु चतुर्षु चतुर्षु ऋतावृतौ मासि मासि वा
कुमारस्य जन्मनक्षत्रे क्रियेताथ देवयजनोल्लेखनप्रभृत्या प्रणीताभ्यः कृत्वा उत्तरेणाग्निं व्रीहीन्
निर्वपत्यग्नय आयुष्मते वो जुष्टं निर्वपामीति वा तूष्णीं वाथान्यान्निर्वपति प्राणाय वो जुष्टं
निर्वपामीति वा तूष्णीं वा तानभ्युक्ष्यावहत्य त्रिः फलीकृत्य त्रिः प्रक्षाल्य निदधाति
तण्डुलान्वा निर्वपति तानभ्युक्ष्यावहत्य त्रिः फलीकृत्य त्रिः प्रक्षाल्यैव निदधाति अथ तिरः
पवित्रं स्थाल्यामपः पयो वानीयाधिश्रित्य तिरःपवित्रं तण्डुलावपत्यथाज्यं निर्वपत्यथाज्य
मधिश्रयत्युभयं पर्य्यग्निकृत्वा मेक्षणं स्रुवञ्च संमार्ष्टि । अथैतं चरुं अपर्यित्वाभिघार्य्यो
दञ्चमुद्वास्य प्रतिष्ठितमभिघारयति परिधानप्रभृत्याग्निमुखात् कृत्वा पक्वाज्जुहोत्यायुष्टे
विश्वतो दधदिति पुरोऽनुवाक्यामनूच्यायुर्दा अग्ने हविषो जुषाण इति याज्यया जुहोत्यथा
ज्याहुतीरुपजुहोति अथान्तरेणाग्निं चाज्यस्थालीञ्च स्थालीपाकं निधारयन्तत्सहस्रं
सम्पाताभिहुतं करोति ॥ २२ ॥ ॥ यो ब्रह्मा ब्राह्मण उज्जभार प्राणैश्वरः कृत्तिवासाः
पिनाकी । ईशानो देवः स न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन स्वाहा । विभ्राजमानः सरिरस्य
मध्याद्रोचमानो धर्मरुचिर्य आगात् । स मृत्युपाशानपनुद्य घोरानिहायुषे नो घृतमत्तु देवः
स्वाहा । ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भं यमादधात् पुरुरूपं जयन्तं । सुवर्णरत्नग्रहमर्कमर्च्यं तमा-
युषे वर्धयामो घृतेन स्वाहा । श्रियं लक्ष्मीमौपलामम्बिकां गां षष्ठीञ्च यामिन्द्रसेनेत्युदाहुः ।
तां विद्यां ब्रह्मयोनिं सरूपामिहायुषे तर्पयामो घृतेन स्वाहा । दाक्षायिण्यः सर्वयोन्यः

मधुच्छिद्रं तपतं सर्पो वा गृहं प्रविशेत्

सुयोन्यः सहस्रशो विश्वरूपाः विरूपाः। पुराणा आयुश्छिदेन प्रमंथंतु वीरान्। तेभ्यो जुहोमि वहुधा घृतेन मान प्रजां रीरिषो मोत वीरान् स्वाहा। एकः पुरस्ताद्य इदं बभूव यतो वभूव भुवनस्य गोपाः। यमप्येति भुवनं सांपराये स नो हविर्घृतमिहायुषेतु देवः स्वाहा। वसून् रुद्रानादित्यान्मरुतोऽथ साध्यानृभून् यक्षान् गान्धर्वांश्च पितृंश्च विश्वान्। भृगून् सर्पांश्चाङ्गिरसोऽथ सर्वान् घृतं हुत्वा स्वायुष्यामहयाम शश्वत् स्वाहेति षड्विंशति शतकृत्वस्तदाहुतीनामष्टसहस्रं सम्पद्यत इति रस्मात्स्य का सौविष्टकृतं जुहोति जय-प्रभृति सिद्धमा धेनुवरप्रदानाद्यथाग्रेणाग्निं दूर्वास्तम्बेषु हुतशेषं निदधाति मानो महान्तं मान स्तोक इति द्वाभ्यामपरेणाग्निं प्राङ्मुख उपविश्य वाग्यतः स्थाली पाकं सगणः प्राश्नाति तस्य प्राशनमायुरसि विश्वायुरसि सर्वायुरसि सर्वमायुरसि सर्वम आयुर्भूयात् सर्वमायुर्गेषमिति प्राश्याथ आचम्य जठरमभिमृशति यत-इन्द्र भयामहे स्वस्तिदा विशस्पतिरिति द्वाभ्यां कुमाराणां ज्वरगृहीतानां ग्रहगृहीतानां मायुष्येण घृतसूक्तेनाहरहः स्वस्त्ययनार्थं स्वाध्यायमधीयीतैतैरेव मन्त्रैर्जुहुयात् दे तैरेव मन्त्रैर्वलीन् हरेत् अगदो हैव भवति तदेत दृद्धमयनं भूतोपसृष्टानां राष्ट्रभृतः पञ्चचोडाः सर्पाहुतीर्गन्धर्वाहुतीरित्येतैरेव मन्त्रैराहुतीर्जुहुयादेतैरेव मन्त्रैर्वलीन् हरेत् अगदो हैव भवति। तदेतदृद्धमयनं हुतप्रहुता हुतानुकृतयोऽन्ये होमाः वलिहरणानुकृतीन्यभ्यर्चनान्याश्रमानुकृतयः संश्रया इति ॥२२॥ ॥अथातोऽर्धमासेऽर्धमासेऽष्टम्यां ब्राह्मणा ब्रह्मचारिणः स्त्रियश्चाहरुपवसन्त्यथ प्रदोषे रुद्रं विरूपाक्षं सपत्नीकं ससुतं सगणं सपार्षदमावाहयामीत्यावाह्य गन्धपुष्प धूपदीपैरभ्यर्च्य प्रतिपुरुषं पौष्टिकान् दीपानेकातिरिक्तांश्चतस्रोऽष्टौ वा देवस्या यतने प्रतिदिशं प्रद्योतयत्युद्धृत्य स्वजातवेदोपघ्नं निर्ऋतिं मम। पशूंश्च मह्यमावह जीवनञ्च दिशो दिश। मानो हिंसीज्जातवेदो गामश्वं पुरुषं जगत्। अविभ्रदग्न आगहि श्रिया मा परिपातय। हव्यवाहमभिमातिषाहं रक्षोहणं पृतनासु जिष्णुं। ० ह्यजरं न आयुरित्येताभिश्चतसृभिरथोपसमिद्ध मग्निं कृत्वा यदशनीयस्य जुहोति इमा रुद्राय स्थिरधन्वन इति षड्भिरनुच्छन्दसं मानो महान्त मान स्तोक इति द्वाभ्यामाद्रिया रुद्रो हेती रुद्रस्येति द्वाभ्यां त्वमग्ने रुद्र आवो राजानमिति द्वाभ्यां द्वादश सम्पद्यन्ते द्वादश मासाः संवत्सरः संवत्सर एव प्रतितिष्ठतीति ब्राह्मणं समिधो वाभ्यादधाति इति विज्ञायते वैष्णवा वै वनस्पतयो विष्णोः सायुज्यं सलोकतामाप्नोति स्तुतिभिः स्तुन्वन्ति ब्रह्म वै ब्राह्मणो ब्रह्मणः सायुज्यं सलोकतामाप्नोति सर्वं पाप्मानं तरति तरति ब्रह्महत्यामथ पुनर्मृत्युं जयतीत्याह भगवान् बोधायनः ॥२३॥

॥ ॥ वलिहरणानुकृतिरुत्सर्गवलिस्तैष्यां पौर्णमास्यां क्रियेतापि वा माघ्यां सहान्तेवासिभिर्ग्रामात प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य यत्रापः सुतीर्थाः सूपावगाह्याः स्रवन्त्यो वा कैन्यः शङ्खिन्य स्तासामन्तं गत्वा स्नात्वा प आचम्य

सुरभिमत्याब्लिङ्गाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिर्व्याहृतीभिरिति मार्जयित्वा
न्तर्जलगतोऽघमर्षणेन त्रीन् प्राणायामान् धारयित्वोत्तीर्य वासः परिधायाप आचम्यापां
समीपे स्थण्डिलानि कृत्वा दर्भानन्योन्यस्मै सम्प्रदाय दर्भैरासनानि कल्पयति ब्रह्मणे
कल्पयामि प्रजापतये कल्पयामि बृहस्पतयेऽग्नये वायवे सूर्याय चन्द्रमसे नक्षत्रेभ्यः
ऋतुभ्यः संवत्सरायेन्द्राय राज्ञे यमाय राज्ञे सोमाय राज्ञे वरुणाय राज्ञे वैश्रवणाय राज्ञे
वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेदेवेभ्यः साध्येभ्यो देवेभ्यः सर्वेभ्यो देवेभ्यः सर्वाभ्यो देव-
ताभ्यः मरुद्भ्यो ऋतुभ्यो भृगुभ्योऽथर्वभ्योऽङ्गिरोभ्यो विश्वामित्राय जमदग्नये भर-
द्वाजाय गौतमायात्रेयाय वशिष्ठाय कश्यपायारुन्धत्यै कल्पयामीति दक्षिणत एकपदे
अगस्त्याय कल्पयामीत्युत्तरतो निवीतिनः कृष्णद्वैपायनाय जातूकर्णाय तरुक्षाय
तृणविन्दवे सोमशुष्मिणे सोमशुष्माणाय वाजिने वाजश्रवसे बृहदुक्थाय वर्म्मिणे
२७।२।७ सनकुमाराय भरद्वाजाय वामदेवाय वाजश्यश्वाय दमायोदमाय ऋणंजयाय तृणं-
जयाय कृतंजयाय सत्यंजयाय बभ्रुवे अरुणाय त्रिपिषाय त्रिपातवेरताय परा-
शरायेन्द्राय मृत्यवे कर्त्रे सुकर्त्रे त्वष्ट्रे धात्रे विधात्रे सुधात्रे सुश्रवसे सुतश्रवसे
सत्यश्रवसे सवित्रे सावित्र्यै छन्दोभ्य ऋग्वेदाय यजुर्वेदाय सामवेदायाथर्ववेदायाथ-
र्वाङ्गिरोभ्य इतिहासपुराणेभ्यः सर्वदेवजनेभ्यः सर्वभूतेभ्यः एकपत्नीकेभ्यः कल्प-
यामीत्यथ दक्षिणतः प्राचीनावीतिनो वैशम्पायनाय कुलिङ्गवे तित्तिरये उखाय
उख्यायात्रेयाय पदकाराय कौण्डिन्याय वृत्तिकाराय काण्वाय बौधायनाय प्रवचन-
कारायापस्तम्बाय सूत्रकाराय सत्याषाढाय हिरण्यकेशाय आचार्येभ्य ऊर्ध्वरेतोभ्यो
वानप्रस्थेभ्यः वंशस्थेभ्य एकपत्नीभ्यः कल्पयामीत्यथ यथास्वं पितृभ्यः कल्पयन्ति माता-
महेभ्यः पितामहेभ्यश्च पृथक् पृथक् एतैरेव नामधेयैर्गन्धपुष्पधूपदीपैरमुष्मै नमोऽ-
मुष्मै नम इत्यन्नेनामुष्मै स्वाहामुष्मै स्वाहेति फलोदकेनामुं तर्पयाम्यमुं तर्पयामीति
त्रीनादितोऽनुवाकानधीयीरन् काण्डादीन् वा सर्वान् काण्डात् काण्डात् प्रश्नेऽइत्येतिया
शतेन प्रतनो षीति द्वाभ्यामुपोदके दूर्वा आरोपयन्तेऽन्योन्यममुष्मा अमुष्मा इति अथा
वगाह्य संपरि गृह्योर्म्मिमन्त्रमुदधिं कृत्वा निरुद्धृत्यातमितो राजिं धावन्ति प्रत्येत्य
गृहानथ ब्राह्मणांस्तर्पयति अपूपैर्धानाभिः सक्तुभिरोदनेनेति यद्भुवे तेभ्यो भवति
त्र्यहमेकाहं वा नाधीयीरन् मासं प्रदोषे नाधीयीरन् नित्यञ्चैव विद्युत्स्तनितवातवर्षाणा-
मेकस्मिन् द्वयोर्वा काले त्रिसन्निपाते त्र्यहं यथोपाकृते छन्दसामेवमुत्सृष्टे कल्पानामेवमेव
पारायणसमाप्तौ काण्डादिदूर्वारोपणोदधिधावनवर्जं ॥ अष्टमः ॥ ॥ बलिहरणा-
नुकृतिरेव सर्पबलिः संवत्सरे संवत्सरे षट्सु षट्सु मासेषु चतुर्षु चतुर्षु मासेषु अतावृतौ
मासि मासि वा श्लेषायितायां (सुक्ति) समीपेन वल्मीकाग्रेण वा पञ्चगन्धोदकैर्वर्णोदकैश्चाभ्युक्ष्य
चित्रियाः सुमनसः प्रकीर्य तिलपिष्टानि यवपिष्टानि ब्रीहिपिष्टानि श्यामाकपिष्टानि
वाज्येनेक्षुरसेनाक्त्वा पायसं घृतपक्वांश्चापूपानोदनं धानाः सक्तून् करम्भीन् लाजानित्यु-
पकिरति नमो अस्तु सर्पेभ्यः इति तिसृभिरनुच्छन्दसं सर्पेभ्यः स्वाहा श्रेषाभ्यः स्वाहा

दन्दशूकेभ्यः स्वाहेति त्रयः स्वाहाकारा उर्वशी गृहपतिर्धृतराष्ट्र ऐरावतो ब्रह्म-
दत्तस्तापसो होता पृथुश्रवा उरुश्रवा दूरश्रवा उद्गाता ग्रावश्चाजगवश्च प्रस्तोतृ-
प्रतिहर्त्तारौ शितिपृष्ठो मैत्रावरुणस्तक्षको वैशालेयो ब्राह्मणाच्छंस्युपशान्तिः तार्क्ष्यः
सदस्यः शिर— तिशि—चौ नेष्टापोतारौ वरुणो होताच्छावाकश्च पिशङ्गावाग्नीध्रो
वाङ्गिरो माहेयः सुब्रह्मण्यो वुरोग्रावस्तुतमोद्व उन्नेता पशुगो ध्रुवगोपः कौत्रुक
स्तावदध्वर्यु अरिमेजयश्च जनमेजयश्चेत्येतैः प्रतिनामधेयैरमुष्मै स्वाहामुष्मै
स्वाहेति सर्पाहुतीः समीचीना मासि प्राची दिगिति षड्भिः पर्यायैर्गन्धर्वाहुतीः
हेतयो नाम स्थ तेषां वः पुरो गृहा इति षड्भिरिदं सर्पेभ्यो हविरस्तु जुष्टमित्युप
स्थानं त्रिवृतान्नेन ब्राह्मणान् संपूज्याशिषो वाचयित्वा व्याख्यातः सर्पबलिः ॥ ॥
।नवमः। ॥ अथेमे देवते प्रवाधिन्यावुद्वाहकाले यस्यमीवेति भवतस्तयोस्तदुप
क्लृप्तं भवति यत् सर्पबलावपांसमीपे द्वे स्त्रीप्रतिकृती कृत्य गन्धैर्माल्यैश्चालङ्कृत्यैव
मेवाभ्यर्चयति तयोरभ्यर्चनमन्त्रस्ते सूनवः स्वपसः सुदंससो महीजज्ञुर्मातरापूर्व-
चित्तये स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः। ते मायिनो
ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा। नव्यं नव्यं तन्तुमातन्वते दिवि
समुद्रे अन्तः कवयः सुदीतय इति। अथेमे उपसंगृह्य पार्श्वे दत्वा त्रिवृतान्नेन
ब्राह्मणान् सम्पूज्याशिषो वाचयित्वा व्याख्यातो बलिर्व्याख्यातो बलिः ॥ ।दशमः। ॥
अष्टकानुकृतिर्मासिकं तत् पुरस्ताद् व्याख्यातं। अथाभ्युदयिकेषु प्रदक्षिणमुपचारो
यज्ञोपवीतं प्रागग्राः दर्भाः युग्माः ब्राह्मणाः यवास्तिलार्थाः पृषदाज्यं हविः
सोयपानेन पात्रेण नान्दीमुखाः पितरः प्रीयन्तामित्यपां प्रतिग्रहणं विसर्जनञ्च
नान्दीमुखेभ्यः पितृभ्यः स्वाहेत्यग्नौकरणमनुदेशनमाशयेषु च परिसमूहेषु
प्रागग्रेषु च दर्भेषु पृषदाज्येनानुप्रदानं। सर्वं द्विर्द्विरित्यथैकोद्दिष्टेषु
नाग्नौकरणं नाभिश्रावणेन न पूर्वं न दैवं न धूपं न दीपं न स्वधा न नमस्कारो
न प्रणवो नान्नापूपं सर्वं सिद्धं समानीयायुग्मान् ब्राह्मणान् सुप्रक्षालित-
पाणिपादानपश्चाचमय्य सदर्भोपक्लृप्तेष्वासनेषूपवेश्य सर्वस्मात् सकृत् समवदाया
भिधार्य्य दक्षिणतो भस्मभिश्राङ्गारान्निरूह्य तेषु जुहुयात् प्रेताया मुष्मै यमाय च स्वाहेति
तद्धुतमहुतञ्च भवत्यथामुष्मै तृप्तिरस्त्वित्यपां प्रतिग्रहणं विसर्जनञ्चामुष्मा उप
तिष्ठन्त्वित्यनुदेशनमाशयेष्वेव पिण्डदानञ्च तृप्यस्वेति संज्ञालनं तृप्तिरस्त्विति
विसर्जनैरस्तु तृप्तिरितीतरेषां प्रतिवचनं प्रेतस्य द्वितीयप्रभृति ब्राह्मणैरेकोत्तर
वृद्धिरादशाहादत्र नवं विद्धि ह्येकादश्यां श्राद्धं तृतीयपक्षे द्वितीयं संततमेकैकेनैका-
दशमासान्नयन्ति न द्वादशमासमत्यवरोहन्ति संवत्सरे सपिण्डीकरणं
साग्नौकरणं साभिश्रावणं सपूर्वं सदैवं सधूपं सदीपं सस्वधा सनमस्कारं
सापूपमथाप्युदाहरन्ति एकोद्दिष्टेन च श्राद्धेनाग्नौकरणमिष्यते। न चाभि
श्रावणं कुर्यान्न च पूर्वन्तु कारयेत्। प्रणवं न च कुर्वीत स्वधाकारं तथैव च।

ऊर्ध्वं संवत्सरात्प्रेतः पितृत्वमुपपद्यते। इतीन्वा इमा अनुकृती र्व्याख्याताः
एकादशे त्रिपक्षेच षण्मासे मासिकानिच। आब्दिकञ्च तथा कुर्य्यादेकोद्दिष्टानि
षोडश॥ ॥ एकादशः ॥ ॥ यथर्तुसंवेशनादि जन्मप्रभृति वा कुमारः
क्रियाभिलुप्तः स्यादुपनयनञ्चैकं स्यात् तासां पृथक् पृथक् क्रियाणां करणं
नचैकहोमे सर्वाणि कर्म्माणि उपपादयेत्। यद्येकहोमे सर्वाणि कर्म्माण्युप
पादयेत् प्रधानादौ प्रधानादौ द्वे द्वे मिन्द्राहुती हुत्वा जयानभ्यातानान् राष्ट्रभृतो
रुद्रानित्यन्तेच विज्ञायते रुद्रो वै क्रूरो देवानां सोऽस्य तुष्टैः प्रीतो भवतीति सर्वत्र
छेदन भेदन खनन निरसन पितृराक्षस नैर्ऋत रौद्राभिचारणीयेषु अप उपस्पृशे
दिति विज्ञायते आपो वै शन्ताः शान्ताभिरेवास्य शुचं शमयतीति ब्राह्मणं आषोड
शात् ब्राह्मणस्यानात्यय इति आद्वाविंशात् क्षत्रियस्याचतुर्विंशाद्वैश्यस्यात ऊर्ध्वं
पतितसावित्रीका भवन्ति नैतानुपेयुर्नाध्यापयेयुर्न याजयेयुर्न विवाहयेयुः।
तांस्त्रिवृता व्रात्यस्तोमेन याजयित्वा विवाहयेयुर्यच्च किञ्चिच्छ्रोत्रियाणां सर्वेषांच
सुशान्तिकं कन्यानांचैव जन्मादिकर्त्तव्याः कर्म्ममङ्गलाः क्रियामयं हि ब्राह्मणं
नाक्रियं ब्रह्मोच्यते नाक्रियं ब्रह्मोच्यते इति॥ ॥ द्वादशोऽध्यायः ॥ ॥

इन्द्राहुतीजुहुयादाहुतिपूर्वकम्

॥ ० ॥ तृतीयः प्रश्नः समाप्तः ॥ ० ॥

यथर्तुसंवेशनादि। अष्टकानुकृतिमासिकं। अथेमे देवते बलिहरणानुकृतिरेव
सर्पबलिः। बलिहरणानुकृतिरुत्सर्गबलिः। अथातोऽर्धमासेऽर्धमासे। यो ब्रह्मा
ब्राह्मणः। आहुतानुकृतिरायुष्यचरुः। अथ यद्यगारे स्थूणा विरोहेत्। प्रहुतानु
कृतिर्वास्तुशमनं। अष्टाचत्वारिंशत् संमितं संमितमित्याचक्षते। षोडशे वर्षे
गोदानं। संवत्सरमेतद्व्रतं चरेत्। आचार्य्यः प्रसुतः कर्म्माणि करोतीति विज्ञा-
यते। हुतानुकृतिरुपाकर्म्माष्टादश ॥ ० ॥ तृतीयः प्रश्नः समाप्तः॥ ० ॥

———— ० ————

अथातः सप्तपाकयज्ञानां प्रायश्चित्तानि व्याख्यास्यामः। तत्रादित
एवोपलिप्ते श्वा वैरको वा यदि गच्छेत् कीटो वा पिण्डकारी स्यात्तं पुनरुपलिप्याद्भिः प्रोक्षति
देवस्य त्वा० हस्ताभ्यामग्नेस्तेजसा प्रोक्षामीति प्रोक्ष्य स्थण्डिलमुद्धरेत् स्थण्डिलमुद्धृतं गौरश्वो वा
यदि विकिरेदन्यद्वा श्वापदमपसव्यं गच्छेत्तस्य पदमभ्युक्ष्य जपति पृथिवि देवयजन्योषध्यास्ते
मूलं मा हिंसिषमित्यथ कर्म्मान्तमेव प्रतिपद्यते। अथ यदि प्रणीतापात्रं भिद्येत् तदभिमन्त्र
यते अभिन्नो धर्म्मो जीरदानुर्यत आत्तस्तदगन् पुनरित्यथान्यदाहरति धर्म्मो देवाँ
अप्येत्विति पूरयित्वा व्याहृतिभिरुपतिष्ठतेऽथ कर्म्मान्तमेव प्रतिपद्यतेऽथ यदि प्रणीता-
प्रणीयमाना प्रणीता वा परा सिच्येरंस्ता अभिमन्त्रयतेऽच्छितोऽस्यच्छित्यैत्वा मामेतेष्टा
अमुत्रामुष्मिंल्लोक इति पूरयित्वोपतिष्ठते भूरायुर्मे धारयत प्राणं मे धारयत प्रजां मे
धारयत माम आयुः प्राणाः प्रजाः पशवः परासिच्येरन्नित्यथ कर्म्मान्तमेव प्रतिपद्यतेऽथ
यदि कन्योपसाद्यमाना वोद्वाह्यमाना वा पतेत्तामुत्थापयेदुदस्थाद्देव्यदितिर्विश्वरूप्यायु

र्यज्ञपतावधात् । इन्द्राय क्रुशवतीभागं मित्राय वरुणाय चेत्यथ कर्म्मान्तमेव
प्रतिपद्यते अथ यदि कन्योपसाद्यमाना वोह्यमाना वा रजस्वला स्यात्
तामनुमन्त्रयते पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभा । पुमानिन्द्रश्च
सूर्य्यश्च पुमांसं वर्धयतामित्यथ कर्म्मान्तमेव प्रतिपद्यते । अथ यदि कन्योप
साद्यमाना वोह्यमाना वाऽश्रु कुर्य्यात्तामनुमन्त्रयते जीवं रुदन्ति वियन्तो
अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः । वामं पितृभ्यो य इदं समेरिरे मयः
पतिभ्यो जनयः परिष्वज इति ॥ प्रथमः ॥ ॥ सर्वत्र दर्विकूर्चप्रस्तरपरिधि
वर्हिःपवित्रेध्मद्रव्यसम्भाराणां छेददाहोपघातेषु नाशे विनाशे वा अन्यं यथालिङ्गं
कृत्वा यथालिङ्गमुपसाद्य जुहोति त्वन्नो अग्ने स त्वन्नो अग्ने त्वमग्ने अयासि प्रजायत
इत्यथ कर्म्मान्तमेव प्रतिपद्यतेऽथ यदि परिस्तरण दाहे स्यात् अग्नये क्षामवते
स्वाहेति हुत्वा परिस्तृणातीन्द्रं विश्वतस्परि रीन्द्रं नर इति परिस्तीर्य्य जुहोतीन्द्राय स्वाहे
त्यथ कर्म्मान्तमेव प्रतिपद्यतेऽथ यदि परिधिदाहः स्यादन्यं यथालिङ्गं कृत्वा यथा-
लिङ्गमुपसाद्य जुहोति परित्वाग्ने पुरं वयमित्यथ कर्म्मान्तमेव प्रतिपद्यतेऽथ
यदि वस्त्राणां प्रोक्षितानां छेददाहोपघातेषु नाशे विनाशे वान्यं यथालिङ्गं
कृत्वा यथालिङ्गमुपसाद्य जुहोति सोमाय स्वाहेति अथ कर्म्मान्तमेव प्रति-
पद्यतेऽथ यदि सिचाभिधातः स्यात्तदभिमन्त्रयते सिगसि नसि वज्रो नमस्ते
अस्तु मा मा हिंसी सूत्रे दशासूत्र मादाय मुखवातेन प्रध्वंसयेदित्यथ कर्म्मान्त
मेव प्रतिपद्यतेऽथ यदि गौर्वा श्वा वा मृग महिषमेष वराह वत्सस्त्वा वान्यद्वा
श्वापदमन्तरा सव्यं गच्छेत्तस्य पदमभ्युक्ष्य जपति तद्विष्णोः परमं पदमित्येत-
येव यदि रौद्रमभिव्याहरेद् द्वे द्विये अचौ जुहुयाज्जपेद्वा त्वमग्ने रुद्र आ वो
राजानमित्यथ यदि शकुनो भिव्याहरेत्तां वाच मनुमन्त्रयते द्विपच्चतुष्पदस्माकं
सर्वमस्त्वनातुरं । उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि
स्वस्ति नः शकुने अस्तु प्रति नः सुमना भवेत्यथ यदि शालावृकी वा श्येत तां
वाचमनुमन्त्रयते दीर्घमुखि दुर्हणु मा स्म दक्षिणतो वद यदि दक्षिणतो
वदा द्विषंतमेव वाध्यासा इति परिभवे परिकासने चाप उपस्पृश्य यथालिङ्गं जपेदनु-
हवं परिहवं परीवादं परिभवं दुस्वप्नं दुरुदितं तद्द्विषद्भ्यो दिशाम्यहं अनुहूतं
परिहूतं शकुनैर्यद्‌शाकुनं मृगस्य हृतमुक्षुयति द्विषद्भ्यो दिशाम्यहमित्यथ
यदि नदीनां धन्वनां च व्यतिक्रमे पुरस्तादुपस्थानं जपति या ओषधयः ० त्वंहस
इत्यथ यदि शकृ — व्यतिक्रमेत् पुरस्तादुपस्थानं जपति नमः शकृत्सदे रुद्राय
नमो रुद्राय शकृत्सदे गोष्ठमसि नमस्ते अस्तु मा मा हिंसीरित्यथ यदि तीर्थ-
स्थाणु चतुष्पथं व्यतिक्रमेत् पुरस्तादुपस्थानं जपति कृतं तीर्थं सुप्रपाणं शुभस्पती
स्थाणुं पथेष्ठामप दुर्मतिं हतमित्यथ चित्रियाणां लक्षण्यानां वृक्षाणां व्यतिक्रमे पुरस्तादुप
स्थानं जपति ये देवा याश्च देवीरेषु वृक्षेष्वासते श्रियामे श्रियं वृद्धिं वहन्तु

(षु वानस्पत्ये)

माहिंसिषुर्वहतुमोह्यमानामिति ॥ द्वितीयः ॥ ॥ सर्वत्र स्वयं प्रज्वलितेऽग्नौ
समिधावादध्यात्युद्दीप्यस्व जातवेदो मानो हिंसीदिति द्वाभ्यामथ यदि
श्मशानं व्यतिक्रमेत् पुरस्तादुपस्थानं जपति योरुद्रो अग्नौ॰ अस्त्विति तमे
वाग्निमुपसमाधाय संपरिस्तीर्य्याग्निमुखात्कृत्वा पक्वाज्जुहोत्यग्निर्भूतानामधि
पतिः समावतु स्वाहा इन्द्रो ज्येष्ठानामधिपतिः स मावतु स्वाहेति जयप्रभृति सिद्ध
माधेनुवरप्रदानादथैनं मिथुनमभिमन्त्रयते इदं मिथुनमायुष्मदस्त्विदं मिथुनं
प्रजावदस्त्विदं मिथुनं पशुवदस्त्विदं मिथुनं वीर्य्यवदस्त्वित्यथो दुत्यं जातवेदसमिति
दक्षिणमनड्वाहं युनक्ति चित्रं देवानामुदगादनीकमिति सव्यं युक्त्वा प्रयातीत्यथ
तीर्थव्यतिक्रमे नावा सन्तारः स्यात्तामनुमन्त्रयतेऽयन्नो मह्याः पारं मेतं स्वस्ति मे
ष्ववनस्पतिरिति नावा तरन्तीं वधूं पश्यति कूलमुत्तीर्य्य जपति समुद्राय वरुणाय
सिन्धूनां पतये नम इति दुर्गमध्वानं वा प्रपाद्य जातवेदस इति सहस्रेणादित्य
मुपतिष्ठते आसन्नभये जलद्यूतव्यवहारे राजकुले व्यसने वद्धो वा निरन्तर
मुपांशु शतं जपेदेतदेव दुःस्वप्नेषु ॥ तृतीयः ॥ ॥ अथाभ्याघातः स्यादग्नि
र्वोद्वातः स्यादपहता असुरा रक्षांसि पिशाचा ये क्षयन्ति पृथिवीमनु। अन्यत्रेतो
गच्छन्तु यत्रैषां गतं मन इति सर्वं तदपहतमिति प्रोक्ष्य स्थण्डिलमुद्धृत्याग्निमुपसमा
धाय परिसंस्तीर्य्याग्निमुखात्कृत्वा पक्वाज्जुहोति यस्त्वा हृदा कीरिणा मन्यमान
इति पुरोऽनुवाक्यामनूच्य यस्मै त्वं सुकृते जातवेद इति याज्यया जुहोति अथा
ज्याहुतीरुपजुहोति ये देवा यज्ञहनो यज्ञमुष इति तिसृभिरनुच्छन्दसं जयप्रभृति
सिद्धमाधेनुवरप्रदानादथ यद्यग्निभेदः स्यात्तमेवाग्निमुपसमाधाय संपरिस्तीर्य्य
प्रधानाहुतीर्जुहोतीह धृतिः स्वाहेह विधृतिः स्वाहेह रंतिः स्वाहेह रमतिः स्वाहेति
जयप्रभृति सिद्धमाधेनुवरप्रदानादथान्यमन्त माहरत्यन्तितोऽस्यन्तिये त्वा माभिहेष्ठा
अमुत्रामुष्मिन् लोके इत्यथैनं रथं योजयत्यातिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी।
अर्वाचीनं सुते मनो ग्रावा कृणोतु वग्नुनेत्यथ रथे मिथुनं प्रतिष्ठापयति प्रति क्षत्रे
प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन्। प्रति-
प्रजायां प्रतितिष्ठामि भव्य इति पूर्ववदनडुहौ युक्त्वा मिथुनं प्रतिष्ठाप्य प्रयात्यथ
यदि बलवता समरथः स्यात्यथोरथं प्रसर्पयत्यनृणा अस्मिन्ननृणा परस्मिन्नित्यथ
पथमवस्थाय यानाय जपति मिथुनस्य स्वस्त्ययन्यस्यापि पन्थामगन्महि स्वस्ति
गामनेहसं येन विश्वाः परि द्विषो वृणक्ति विन्दते वस्वित्यथ रथमभिप्रैति पथस्पथः
परिपतिमित्यथ यदि विद्युत्स्तनितसंत्रासः स्यात् तमस्यैन्द्रिये ऋचौ जपति
यत इन्द्र भयामहे स्वस्तिदा विशस्पतिरिति ॥ चतुर्थः ॥ ॥ अथ पाकयज्ञानां
प्रायश्चित्तिस्तद्यथा द्रव्यहविर्मन्त्रकर्मादीनामतिपन्नस्कन्नभिन्नच्छिन्नभग्ननष्टदुष्ट
विपरीतदग्धाशृतातिशृतानामनाम्नातेषु जुहुयान्मनो ज्योतिरयाश्चाग्ने यदस्मिन् कर्मणि
स्वस्तिन इन्द्रो वृद्धश्रवा इति व्याहृतीभिश्च व्याहृतीनां प्रयोगेऽयथाकृतं यावद्भवतीत्याचार्य्याः

ब्रुवते तत्रोदाहरन्ति भूरित्यृचो भुवइति यजूंषि सुवरिति सामानि प्रवृत्ते कर्म्मणि
प्रधानादौ जुहुयादिति बौधायनः प्रधानान्तइति शालीकिः पुरस्तात् स्विष्टकृत
इत्यौपमन्यवः ॥ पञ्चमः ॥ ॥ अथ गर्भाधान पुंसवन सीमन्तोन्नयन विष्णु
वलि जातकर्म्म नामकरणोपनिष्क्रमणान्न प्राशन कर्णवेधन चौलोपनयनात् कार्य्यं
नकारयेत् यदि समानं कर्म ततं मआपोयत्साकत्रा मनस्वतीमिन्द्राहुतीर्महा
व्याहृतीर्व्याहृतयश्च प्रायश्चित्तं जुहुयादिति कालातिक्रमे प्रधानादौ द्वेद्वे मिन्द्रा
हुतीजुहुयाद् व्याहृतिपूर्वकं चेति सर्वेषां समान माचार्य्या ब्रुवते तत्रोदाहरन्ति
पक्वं सौविष्टकृतमाज्यं प्रणीतोपसादनं ब्रह्मणामिध्मा वर्हिरेकमिति विज्ञायत
इतिहि ब्राह्मणं ॥ षष्ठः ॥ ॥ अथ विपरीतं दर्भास्तरणं पवित्रकरणं
पात्रासादनं प्रोक्षणीसंस्कारो ब्रह्मा प्रणीता हविर्निर्वपणमाज्यसंस्कारः पर्य्यग्नि-
करणं स्रुक्स्रुवसंमार्जनं चरुमभिधारणमुद्वासिताभिधारणं परिधिपरिषेचने
ध्माग्याधावन विपरीतेषु प्रायश्चित्तं ततं म आपो यत्साकत्रा मनस्वता मिन्द्राहुती
महाव्याहृतिर्व्याहृतयश्च प्रायश्चित्तं जुहुयादिति बोधायनः ॥ सप्तमः ॥ ॥
अथातः सर्वप्रायश्चित्तानि व्याख्यास्यामः नष्टदुष्टस्फुटितेषु श्वकाकखरमृग
विपरीतहोमे हविःस्पन्दने स्नावित पतिते
पशुपक्षिसरीसृपाणामन्यः कीटोवा अलिजोऽग्नेरन्तरा गच्छेद् दुर्गां मनस्वती
महाव्याहृतीस्तिस्त्रस्तन्तुमतीर्जुहुयात् सैव ततः प्रायश्चित्तिः ॥ अष्टमः ॥ ॥
अथातः सप्तपाकयज्ञानां प्रायश्चित्तसमुच्चयं व्याख्यास्यामो हुतः प्रहुतः आहुतः
शूलगवो वलिहरणं प्रत्यवरोहणमष्टकाहोम इति सप्तपाकयज्ञसंस्थासु न प्रयाजा
इज्यन्ते नानुयाजा न सामिधेनीरन्वाहतेषु कर्म्मस्वग्निमुपसमाधाय संपरि
स्तीर्य्य यत्रयत्र दर्विहोमं कुर्य्यात् तत्रतत्र चरुं समवदाय जुहोति सर्वत्र स्कन्ने
भिन्ने छिन्ने होमे विपर्य्यासउद्दाह ऊनातिरिक्ते पात्रनाशे पात्रभेदे मिन्द्राहुती जु-
होति मक्षिकैर्मशकैर्लोमभिः पिपीलिकैर्वा यदि नाप विन्देत प्रजापतये होमं विद्यात्
व्यापन्नमाज्यं व्यापन्नमन्तर्हितं मनज्ञात प्रायश्चित्तं चतुर्होतारं चानुख्यं च जुहोति
मण्डूकसर्पमूषक मार्जारान्तरागमने प्रायश्चित्तं पञ्चहोतारं चानुख्यं च जुहोति
घटसमुद्रीं जुहोति अन्तरागमने प्रायश्चित्तं दशहोतारं चानुख्यं च जुहोति अन्तर्हृदये प्रायश्चित्तं
विस्तृतरूपे विकृतशब्दे विस्फुरणे च प्रायश्चित्तं शयुवाकं चानुख्यं च जुहोति
अनादिष्टं सर्वप्रायश्चित्तं व्याख्यातं वारुणीभिर्निर्दिशेत् संस्कारान्तोऽग्नावुत्सन्ने
तद्भस्मोक्ष समिधि समारोपणं समिधं वा यदि न विन्देद्यशिकं वा काष्ठं समा
रोपयेत् प्रायश्चित्तिरिति महाव्याहृतीः सप्रणवाश्च मनस्वतीश्च जुहोति
स्वराक्षरपद वृत्तभ्रेषेषु आभिर्गीर्भिरिति सर्वत्र पाकयज्ञानां सदस्येभ्यो धेनु
मृषभमनड्वाहं हिरण्यं कांस्यं वासो वेति दद्यात् सदस्याः प्रायश्चित्तानि
प्रतिनिधींश्च संबोधयिष्यन्तीति भगवान् बोधायनः ॥ नवमः ॥ ॥
अथ यदि होमकालेष्वग्निरुद्वातस्यादपहता असुरा रक्षांसि पिशाचा ये क्षयन्ति
पृथिवीमनु । अन्यत्रेतो गच्छन्तु यत्रैषां गतं मन इति सर्वं तदपहतेति प्रोक्ष्य

४०/७/८

स्थण्डिलमभ्युद्धृत्याग्निमुपसमाधाय संपरिस्तीर्य प्रायश्चित्तं जुहोत्ययाश्चाग्नेः पञ्चहोता ब्राह्मण
एकहोता मनस्वती मिन्द्राहुती महाव्याहृती र्व्याहृतयश्च प्रायश्चित्तं जुहुयादिति बोधायनः ।
अथ यद्युपनयनाग्नि र्विवाहाग्नि र्जातकाग्निः श्मशानाग्नि राचतुर्थादाग्न्दशात्संचयनादग्निरुद्धृत
स्यादपहता असुरा इति प्रोक्ष्य क्षिप्रभस्मसमारोपणं मयन्ते योनिर्ऋत्विय इति समिधि
समारोप्य लौकिकमग्निमाहृत्य समिधमादधात्याजुह्वान उद्बुध्यस्वाग्न इति द्वाभ्यां
संपरिस्तीर्य आज्यं विलाप्योत्पूय स्रुक्स्रुवौ निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वा
प्रायश्चित्तं जुहोति अयाश्चाग्नेः पञ्चहोता ब्राह्मण एकहोता मनस्वती मिन्द्राहुती महा
व्याहृती र्व्याहृतयश्च प्रायश्चित्तं जुहुयादिति ॥ दशमः ॥ ॥ अथ गृहमेधिनो ब्रह्मचा
रिणश्चानुगतेऽग्नौ कालातिक्रमे होमयोर्दर्शपूर्णमासयोश्चाग्रयणेनानिष्ट्वा नवान्नप्राशना
आज्यस्कन्नावधूत मन्त्रहीनधिक्कर्मण्याकृत सीमन्तायां प्रसूतायां भार्यायामु स्त्रीषु गोषु वा
यमलजनने रजस्वलाभिगमने पतितसम्भाषणे दिवामैथुने शूद्रागमने स्वप्नान्ते रेतःस्कन्दने
उदकेषु मूत्रपुरीषकरणे कुमारस्य जातस्य संस्कारे लकृतो ग्नेः संसर्गे देवताविपर्यासे
मन्त्रविपर्यासे तन्त्रविपर्यासे कालविपर्यासे कर्मविपर्यासे ब्रह्मचारिव्रतविपर्यासे मेखला
यज्ञोपवीतस्योच्छेदे कृष्णाजिनस्याधारणे कमण्डलुधारणे दण्डभङ्गे सन्ध्यालोपे अग्नि-
कार्यलोपे उदकुम्भलोपे स्वाध्यायलोपे भिक्षाचरणलोपे शुश्रूषालोपे एतेषु चान्येषु चानाम्ना-
तेषु प्रायश्चित्तमग्निमुपसमाधाय संपरिस्तीर्य प्रायश्चित्तं जुहोति पाहि नो अग्न एनसे स्वाहा
पाहि नो विश्ववेदसे स्वाहा यज्ञं पाहि विभावसो स्वाहा सर्वं पाहि शतक्रतो स्वाहा पाहि नो
अग्न एकया पाह्युत द्वितीयया । पाहि पाह्यूर्जं तृतीयया । पाहि तिसृभिरूर्जां पते पाहि चत-
सृभिर्वसो स्वाहेति व्याहृतीभिः पुरस्ताच्चोपरिष्टाच्च सानुक्रमणं यथापूर्वकरणं अविच्छिन्नं
संततं भवतीति ॥ ११ ॥ अथ गृहस्थस्य विद्यार्थिनः स्त्रियाभ्यनुज्ञातस्य ऋतु-
संसेवन विच्छिन्न प्रायश्चित्तानि व्याख्यास्यामो वसन्त ग्रीष्म वर्षा शरद्धेमन्त शिशिराणां
ऋतुकालमुक्त्वा ब्राह्मणेभ्यो निवेदयित्वाचीर्णव्रततया प्रदोषे देवयजनोल्लेखन प्रभृत्याग्निमुखान्
कृत्वा पक्वाज्जुहोति यस्त्वा हृदा कीरिणा मन्यमान इति पुरोऽनुवाक्यामनूच्य यस्मै त्वं सुकृते
जातवेद इति याज्यया जुहोत्यथाज्याहुतीरुपजुहोति मधुश्च स्वाहा माधवश्च स्वाहा
शुक्रश्च स्वाहा शुचिश्च स्वाहा नभश्च स्वाहा नभस्यश्च स्वाहेषश्च स्वाहोर्जश्च स्वाहा सहश्च
स्वाहा सहस्यश्च स्वाहा तपश्च स्वाहा तपस्यश्च स्वाहा संसर्पोऽस्यंहस्पत्याय स्वाहेति
स्विष्टकृत् प्रभृति सिद्धमाधेनुवरप्रदानात् अपरेणाग्निमाज्यशेषं पक्वशेषं उभौ वा
जायापती प्राश्नीयातां ऋतुसंसेवन विच्छिन्न प्रायश्चित्तं व्याख्यातं ॥ द्वादशः ॥ ॥
गृह्यप्रायश्चित्तं समाप्तं ॥ ॥ चतुर्थः प्रश्नः ॥ ॥